स्वरशास्त्रोक्ततालानि सप्तशतविधानिच।
प्रभवन्ति सदा नृत्ये गान्धर्वमत सेवितं।।२११

तालद्विविध सा प्रोक्ता मार्गलौकिकएवच।
दीर्घताल लघुताल विषमताल साधनं।।२१२

तालदीर्घह्रस्वयुक्तं छेदभेद विशेषतः।
मात्रायुक्तं समाबद्ध स च हि तालकेवलं।।२१३

प्रवक्षाम्यत्रभेदानि यत्किञ्चत् तालभेदयोः।
विषमाविपुलाठेका आडठेका तथैव च।। २१४

कल्याणगजकङ्कालि जयतालत्रिभङ्गकं।
द्वन्द्वप्रतापहंसाख्या मुकुन्द मलयस्तथा।।२१५

मल्लतालसिंहनाद नान्दीतालं च उत्सवा।
उद्दण्डउद्धट्ट तालं, राजराजचूड़ामणिं।।२१६

अष्टतालत्रिपुटंच षष्ठतालंच कुम्भवेत्।
एतानि विविध तालानि रम्यनृत्ये मनोरमा।।२१७

विषमस्ताल स ख्यातः विपुला एकतालवत् ।
अनुद्रुतद्रुतश्चैव विरामह्रस्वसाधनं।।२१८

एकतालिस्तथाढेका मात्राषड्भिः सुशोभितं।
त्रयस्तालस्त्रयोभेदाढेका आडढेकाउच्यते।।२१९

त्रिढेकायुक्तकल्याण गजह्रस्वचतुष्टयं।
द्वयंद्रुत द्वयोर्दीर्घढेकतालादिसन्निभं।।२२०

एवंकल्याणीसास्तालंनृत्यकाले प्रशंसितं।
द्वयंह्रस्वद्वयोदीर्घह्रस्वान्ते पूर्ववत् तथा।।२२१

ह्रस्वद्वयंपुनःद्वीपुर्घनःढेकादिदीर्घिका।
मात्राद्वयंह्रस्वयुक्त विराममेक शोभितं।।२२२

हंसतालइतिख्यातः लास्ये मुकुन्द एवच।
ढेकाह्रस्वचतुःद्रुतं दीर्घठेकाच मध्यमे।।२२३

ह्रस्वद्रुत पुनर्ह्रस्वह्रस्वद्रुत चतुष्टयं।
मलयदीर्घह्रस्वेच पुनःदीर्घतमेतथा।।२२४

मल्लचतुष्टयंह्रस्वो पुनःद्रुत द्विसंख्यकः।
सिंहनादह्रस्वयुक्तंपुनःह्रस्व त्रयान्वितं।।२२५

द्रुतद्वयंपुनःह्रस्वत्रययुक्तातिशोभना।
ढेकाह्रस्वद्रुतोद्रुताह्रस्वद्वयंच दीर्घिका।।२२६

पुनःढेकाह्रस्वद्रुताह्रस्वदीर्घंचदीर्घिका।
ह्रस्वप्लुतसमायुक्तं उत्सवानन्द वर्द्धिनी।।२२७

ढेकाद्रुतद्वयन्तोच ह्रस्वा उद्दण्डउच्यते।
दीर्घत्रयोउद्धटाच दीर्घाह्रस्वा द्विद्रुतये।।२२८

ढेकाद्रुतद्वयोह्रस्व द्रुतह्रस्वंच दीर्घिका।
पुनर्ढेकाद्रुताद्रुतह्रस्वत्रयद्रुतद्वयं।।२२९

ह्रस्वदीर्घसमायुक्तं राजचूडामणिंतथा।
अनुद्रुतंद्वयद्रुतं ह्रस्वंस्थान तथैवच।।२३०

अष्टताल इतिख्यातः सर्वनृत्ये प्रशंसितं।
द्वयद्रुतं ह्रस्वयुक्त त्रिपुटतालमुत्तम् ।।२३१

षष्ठाद्रुते विश्राम लघुनृत्ये विशेषतः।
पञ्चद्रुता अनुताद्रुता विरामदीर्घिका।।२३२

ताललक्षण मात्राणि ह्रस्वदीर्घप्लुताक्रमे।
द्रुताअनुद्रुताश्चैव विश्राम सूक्ष्मभावना।।२३३

तालमात्रा बहुभेदाः देशकालान्तरे स्मृताः।
नृत्यतत्वा न्वयीग्रन्थे विशदाः किंप्रयोजनः।।२३४

एवंमात्राक्रमेतालभेद स्थान विचारणे।
करणीयं यथाशास्त्रे आचारे नियमे यथा।।२३५

देशाचारेकृतंताल चारी[1] लक्षण साधनं।
तालनास्त्रुततत्भूमिभूम्यानुस्त्रुत नर्त्तनम् ।।२३६

भूमी (क्षेत्र)
समंच विषमाभूमिभूमि पद्मत्रिकोणका।
स्वस्तिकंचक्रवर्त्तुलं चतुरस्त्रादि अष्टधा।।२३७

एबंभूमौषरिनृत्यं कर्त्तव्यानि विधानतः।
भूम्यानुसारिणीचारी भौम्रा[2] इत्यभिधीयते।।२३८

चारी
चारी सा द्विविधा प्रोक्ताभौमीगमनमाश्रिता।
भूमिसम्पृक्तभौमी सा शून्ये गगन नामिता।।२३९

---

१. M.S.S. 2 – छन्द
२. M.S.S. 2 – भङ्गी

रथचक्रापरीवृत्ता स्यन्दिता नुपूरपादिका।
मरालाकरिहस्ता च उरु वेणी च उन्मुखी।।२४०

कातरामृगत्रासाख्या अर्द्धमण्डलिकाक्षणा।
स्थितावत्ताइतिभेदाः चारी भौमीविधानतः।।२४१

मन्दाक्रान्ताअतिक्रान्ता प्लुतानगर मालिनी।
क्षीणाकुटिल चक्राब्ज तोषिणी मनहारिणी।।२४२

एवं बहुविधाचारी गगना नाम धारिणा।
विविधन्यासभेदेन बन्धनृत्ये विचक्षणा।।२४३

ग्रन्थान्तरेषुसूत्राणि यानिपूर्वे सुचिन्तितैः।
पूर्बग्रन्थानुसारेण येनदेशे प्रचारितं[१]।।२४४

युग्मनृत्य

श्रृणुअन्यतमंभेदाः उत्कले यः प्रतिष्ठितं।
युग्मप्रशंसितं नृत्तं पौराणिक स उच्यते।।२४५

विकट रूपभेदेन विविधंपार्वणोचिते।
विविधस्थानभेदेन विभिन्नविषयाणि च।।२४६

विकटद्विविधा प्रोक्तापौराशिक्षयिकातथा।
एकंपुराणमाश्रितं अपरं शुद्धलौकिकं।।२४७

कुत्राभिनयरूपेण श्रीकृष्णचरितावली।
नृत्यप्रदर्शनेकुत्र श्रीमद्रामायणं तथा।।२४८

---

१. M.S.S. 2 यथा देशे प्रचारित

हरिश्चन्द्रस्यकारुण्यं सागरसुत विक्रमम् ।
नानारूपाश्रयेनृत्यं लीलोत्सव स उच्यते।।२४९

मेषेचडकसंक्रान्त्यां चटका पाटवादयः।
विविधरूपयुक्तेन कुत्सितंरूप धारणं।।२५०

पुनःग्रामान्तरेकुत्र *वाउरिरजकादिभिः।
आचरेत्‌विविधंनृत्यं सुरम्येभिल्लनारीवत् ।।२५१

क्वचित्‌ग्राम्यान्तरेरम्ये घोटका, दानवाकृतिः।
रूपाश्रये भवेत्‌नृत्यं विकटं कौतुकावहः।।२५२

नृत्यंगोप्यतमं दिव्यं सर्वानन्द प्रदायकं।
नानाभेदसमायुक्तं मतानि विविधानि च।।२५३

तथापि क्षीणज्ञानेन यन्मया साधनंकृतं।
निवेदयामितत्सर्वं ज्ञानार्थिनांहितार्थये।।२५४

नृत्याभिनयभेदेनभिन्न भिन्नार्थ वर्त्तते।
तथापिसर्वभेदानां पूर्वाचार्य्यअनुश्रुतम् ।।२५५

अथ वस्तुप्रसङ्गेन वेशविन्यासमुत्तमं।
नटज्ञातव्यरूपेण प्रवक्षामि बिधानतः।।२५६

सर्वादौवीक्षणंलास्ये वेश कृत्य सुमङ्गुलं।
वेशदर्शनमात्रेण मनाकृष्टं च जायते।।२५७

वेशविन्यास (चित्रद्रष्टव्य)

विनावेशेनशोभन्ते मुद्रादृष्ट्यादिचालना।
शृणुवेशक्रमंरम्यं देव राजगणप्रियं।।२५८

---

* अन्त्यजजाति विशेषः

चूड़ान्यासत्रिभेदंच पुष्पचूड़ार्द्धवक्त्रकं।
कटिवेणीतथान्यासेत् पिच्छिलं सर्पदेहवत् ।।२५८

शिरोदेशेसुवर्ण्णेनकार्वकरा[1] रागड़ादयः[2]।
चन्द्रं[3]संमुखदेशेच पार्श्वदेशेति शोभने।।२६०

मथा[4]मणिंमध्यदेशेवेकतकी[5] सुमनोहरा।
शिरंमण्डयते एवं सुवर्ण्णेन सुयत्नतः।।२६१

कर्ण्णद्वये कोरकंच[6] अथवा कापएवचत[7]।
त्रिगण्ठिकुण्डलंदिव्यं[8] वीरोवल्योग्रं[9] नर्त्तने।।२६२

कर्ण्णोर्द्धेनागपाशंच[10] बकुलकलिकोत्तमा[11]।
कण्ठाभरणरूपेण न्यासयेत् चापसोरिका[12]।।२६३

आमलकी[13]सर्षपीच[14] चम्पकी[15]कलिकाकृते।
मालान्यासयतेवक्षे काञ्चल्योर्द्धेविशेषतः।।२६४

काञ्चलादिव्यरङ्गेन नानारत्न विमण्डिता।
आवृतंवक्षदेशंच दृढेरम्ये सुयत्नतः।।२६५

मुख्यपदकंसंस्थाप्य वक्षमध्ये सुशोभने।
समान्तरालभावेन पदकंतिलकंतथा।।२६६

गोरोचनांसमालेप्यकपोले उर्द्धवपुण्ड्रवत् ।
भ्रुयोर्मध्ये च सिन्दूरंबिन्द्वाकारे विलिख्यते।।२६७

चिबुके मक्षिकाचिह्नं कृष्णवर्ण्णे विशेषतः।
नयने कज्ज्वलंस्निग्धं मीनपृच्छाकृते सदा।।२६८

वाहुदेशे तायितं[16]चकङ्कणं[17]ताड़कद्वयं[18]।
रसो[19]नवाङ्किता[20]माला निम्ने कवच[21] भूषयेत् ।।२६९

करन्निम्ने अतुलंच[22] कल्यारि[23] करकङ्कणं[24]।
कुङ्कुमेन समालेप्य युग्मंकरतलं सदा।।२७०

नाभिनिम्नप्रदेशेच कटिदेशे मनोरंमे।
भूषयेत् भेकमुखादौ[25] कापमालोपरितथा।।२७१

किङ्किणि[26] निम्नभागेन मध्ये[27]झोवाविमण्डयेत् ।
नीवीबन्धनदृढ़ेन कटिदेशेतिशोभने।।२७२

पाददण्डे दृढारोप्य चापु[28]आणीमनोहरे।
मण्डयेत्पाददेशेन नूपुरं[29] पाहुड[30] बलाः[31]।।२७३

चुपुल्याङ्गुष्ठयुक्तेन[32] अलक्ताद्रवरंजिता।
वेशविन्यास संयुक्ते नृत्य नेत्रप्रियंभवेत् ।।२७४

देशभेदे कथिता सो उड्रगान्धर्वउच्यते।
केवलाभिनयदृष्टे ग्रन्थाभिनय चन्द्रिका।।२७५

ममाराध्यगुरुदत्तंसम्यक्ज्ञानानुसारिणी।
*ग्रन्थाकारे प्रबोधार्थ गान्धर्वकुशलान्प्रति।।२७६

यदिशुद्धमशुद्धं वा द्विरुक्त विषयं क्वचित् ।
प्रसङ्गक्रमभेदेन ममदोषो न विद्यते।।२७७

उड्रदेश प्रशंसा

वैतरणीतटारभ्य यावत्महेन्द्र पर्वतं।
तावत् भूमि सुविख्यातं उड्रनामातिशोभना।।२७८

महोदध्यत्तरेपार्श्वे यत्रप्राची सरस्वती।
तत्र पुण्यतमंक्षेत्रं श्रीपीठे पुरुषोत्तमं।।२७९

नीलाद्रौपरिप्रासादं रम्यंगगन चूम्बिनी।
गङ्गकीर्त्ति इतिख्यातःयावत् भुवनमण्डले।।२८०
सुविख्यातोक्त वंशेऽनङ्गभीमाङ्कितपदे।

ग्रन्थरचनाकाल

खेमण्डिराजमार्त्तण्ड सर्वविद्या विभूषिता।।२८१

श्रीमान्नारायणदेवो भूपालो धरणीपति।
गजपतिपदाक्रान्त राजा सर्वजन प्रियं।।२८२

कविताकुञ्जकोकिलंशिखिवत् नर्त्तनप्रियं।
शुकवत् सर्वदावाक्ये कृष्ण कृष्णेति केवलं।।२८३
एवंसौम्यतमंरूपं भुजबलं पराक्रमं।

---

* M.S.S. 2 – भावखण्डप्रवक्ष्यामि।

राजत्वे वसुवर्षीये पुस्तकमिदं सम्पूर्णं*।। २८४
इतिश्री महेश्वर महापात्रेण विरचित
अभिनय चन्द्रिकायां नृत्यखण्ड
नामा प्रथम स्तवक:।।

●

अथभावभण्डम्

नृत्यंहि सर्बदाश्रेष्ठ:राजकार्य्येमहोत्सबे।
विनोदेब्यसनेचैव नृत्यमानन्द दायक।।१

नृत्यवाद्य विनोदेन चतुर्भवति निश्चलं।
तथापितद्विनाभावं केवलं नर्त्तनं ध्रुवं।।२

भावयुक्ते तथा मुक्ते मन: प्रवृत्तिनिर्वृति।
तदानुसारिणीभावा: विकारा मानसात्मिका।।३

भावहाव तथाहेला अङ्गजानटी मोदिता।
नागरीशोभिता:सर्वे भावलंकार मुख्यत:।।४

निर्विकारात्मिके चित्ते भाव: प्रथम विक्रिया।
स्पन्दनाकृति संभाव मानसाङ्ग विवर्द्धिनी।।५

विनाभावे सदावलीवं मन:मूढ़ो विशेषत:।
भावयुक्ते मनोयाति दृश्यभेदेच ईक्षणे।।६

नायिका नायकभेदे दृश्यादृश्यागमे तथा।
प्रकाशयन्तिअङ्गेन भङ्गीयुक्ते मनोरमे।।७

तत्श्रेष्ठभाव नाम्ना सा नृत्याङ्ग मुख्यद्योतना।
विनाभावे न सिद्ध्यन्ति नृत्याभिनय मुख्यत:।।८

---

* सम्पूर्णमिदंपुस्तकं

इतिमतिगताक्षिप्रा भावनृत्ये विधानतः।
उद्दूदेशेसदाभावरंजितं नृत्यमण्डलं।।९

वटुनृत्योत्तमे लास्ये केवलंभाव मुख्यतः।
छन्दबन्धे तथा नृत्ते भावादि किं प्रयोजनं।।१०

देहेभावगतिरम्ये इङ्गितादि विलक्षणे।
रति विरति संयुक्ते नृत्याभिनयपेक्षणी।।११

सत्वरजोतमो वृत्ते विंकारः भावमुच्यते।
रसज्ञानात्क्रमेभावःनृत्ये आनन्द वर्द्धकः।।१२

रसभेदानि

त्रिभेदगुणयुक्तेन सात्विके सात्विकं तथा।
स्थायीरजोगुणापेक्षी तामसे व्यभिचारिणी।।१३

गुणत्रय विभागेन गुणादिभावलक्षणः।
क्रोधउत्साह हास्यं च शोकभावतथैव च।।१४

भयंचरतिरम्यंच विस्मयंभाव लक्षणं।
युगुप्सा इति अष्टानां स्थायीभावाः विनोदनं।।१५

शङ्कासूया दैन्यचिन्तामोहश्चेति धृतिर्गुणाः।
व्रीड़ाहर्षस्तथागर्वः विषादं स्वप्नचिन्तनं।।१६

निरोधमदनिर्वेदभ्रममालस्य उग्रता।
अपस्मारममर्षादि व्याधिमृत्यूभयं तथा।।१७

वक्त्रे जड़तामालस्यंभ्रमग्लानितथैवच।
निर्वेदइति भावानि त्रिंशश्च व्यभिचारिका।।१८

सात्विकभाव लक्षणम्

शृणु अष्टविधाः भेदाः सात्विकभाव लक्षणं।
स्वेदरोमाञ्च स्तम्भोऽथ स्वरभङ्गादिवेपथुः।।१९

वैवर्ण्यमश्रुपातंच प्रलयादि प्रदर्शनं।
अभिव्यक्तिविमुक्तिं च रतिर्मानस लक्षणः।।२०

त्रिविधाभावमुख्याच रतिज्ञान प्रदर्शने।
इति ख्याता महाभावाः कर्त्तव्यानृत्यवेदिना।।२१

अलंकारमयंभावाः लीलाविलासतत्परा।
भावानुपेक्षितंहाव हेलाअङ्गादि दिप्तिता।।२२

शोभाकान्तिप्रगल्भं च औदार्य्यंधैर्य्यएवच।
माधुर्य्यरति लीला च विलासविभ्रमं तथा।।२३

किलकिञ्चित् विच्छित्ति विव्वोक ललितंततः।
मोट्टायितंकुट्टमितं विकृतादि विमूर्च्छना।।२४

काव्यशास्त्रानुसारेण रतिनृत्ये समाचरेत् ।
उड्डदेशे सदाश्रेष्ठं नृत्याभिनय प्रक्रिया।।२५

साभिनयं सदा काव्यापेक्षणी जनमोहिनी।
यद्यपिकाव्यं हि मुख्यं गानकाल विचारणा।।३६

विनालंकार युक्तेऽन निष्फलंनीरवंसदा।

वटुनृत्य

वटुनृत्ये नहि वाद्यं नहिकाव्य विनोदनं।।२७

केवलंतानयुक्तेऽन स्वैरतालादि मुख्यतः।
तथापिलोचनेओष्ठेकट्यां पादद्वयेतथा।।२८

विनालंकारयुक्तेन नृत्यादि विफलं भवेत् ।
शृणुत्वं लक्षणं दिव्यं अलंकारादयः पुनः।।२९

लक्षणादिसमायुक्ते सर्वकारण संग्रहः।
ग्रीवानेत्रेतथाकट्यांभ्रूभङ्ग्यादिप्रकाशनं।।३०

भावानुपेक्षितंसर्वं अंगादिहाव कथ्यते।
केलिपातंश्चचशृङ्गारे मैथुने कामसूचके।।३१

हेलाइतिरतिभावं नृत्यार्थी मोददायकं।
बेशविन्यासयुक्तेन जूड़ादिकाञ्चलादयः।।३२

त्रिकच्छादि समायुक्ते शोभा अंगविभूषणं।
शोभायुक्ते तथाकान्ति सौष्ठबं लक्षणानिच[१]।।३३

न पृथुलं न चक्षीणं कान्तिमध्यमसुन्दरं।
मध्यांगकान्ति युक्तेन देशपात्र विचारणा।।३४

प्रसंगक्रमभेदेन कान्तिदीप्तिकरंभ्रुबं।
प्रयोगे वा प्रकारे वा पात्रा पात्रविचारणा[२]।।३५

बुद्धियुक्ते तथारंगे क्रीडनेच प्रगल्भता।
सर्वभावान्वये अंग हृदये विनयं महत् ।।३६

नम्रभावानुयुक्तेन नटी औदार्य्य प्राप्यते।
तालमानानुसारेण पादादि पातन क्रिया।।३७

---

१. M.S.S. 2 -न्वित
२. M.S.S. 2 - विचारयेत्

विधियुक्ते तु कर्त्तव्यं धैर्य्ययुक्ते सदानटी।
इतिधैर्य्यसदाश्रेष्ठ नृत्यालंकारभूषणं।।३८

भूषणादिसहरम्यं लीलाविषयभूषणं[१]।
सर्वलक्षणसंयुक्तं सर्वांगंभूषणानिच।।३९

वेशानुरूपकं अंगरतिमाधुर्य्य उच्यते।
गतिपादादिभिः भंगी मुखनेत्र समन्विते।।४०

चालनादि सुरम्येन विलासंरास मण्डना।
विभ्रमंवटुनृत्येन विरहभावपेक्षणी।।४१

हताशाकामक्रान्ता या नटीविभ्रम मानसा।
इतस्तुते[२] तथामाला वस्त्रादिभूषणादयः।।४२

अव्यवस्थित भूषाच विभ्रमंरतिमुत्तमं।
इर्ष्यापरिविमर्षेच दर्शने दर्शनोत्सुकः।।४३

आकांक्षित इतिभावः नामितं किलकिञ्चितं।
विच्छित्तिव्यक्तभावेन विब्बोकाव्यक्त चिन्तने।।४४

गर्वभावे सदाश्रेष्ठं विब्बोकइति लक्षणं।
शान्तभावानुयुक्तेन रम्ये लघुमनोहरा।।४५

भ्रुवादिचालने मिष्टं ललितं मधुर प्रियं।
प्रियालिङ्गन युक्तेन हृष्टं[३] प्रफुल्ल मानसं।।४६

---

१. M.S.S. 2 – पेक्षणम्
२. M.S.S. 2 – विचारयन्
३. M.S.S. 2 – उत्फुल

उत्फुल्ल

मात्रभङ्गीसमायुक्तेः विपरीताङ्गदर्शनम् ।
हृदयेललितंभावः प्रकाशेक्रोध लक्षणम् ।।४७

एवंव्यतिक्रमरीत्या कुट्टमितं मनोरमा।
नागरप्रीति सन्देशे नागरः पत्रपाठने।।४८

उत्पद्यते यः प्रीतिभावं समोट्टायित कथ्यते।
विरुद्धभाषणेघोरे वटुनृत्ये विशेषतः।।४९

उग्रादिभाव सम्पन्ने विकृतंरतिमुत्तमं।
एवंसर्वविधंनृत्ये प्रपञ्चेऽभिनये तथा।।५०

अलंकारान्वितरीत्या नृत्येषुरम्य सर्वदा।
लघुनृत्ये तथालास्ये रम्यंरम्यतरं [illegible]त् ।।५१

विना[illegible] सुदृष्ट्यादि सकलोनिष्फलो भवेत् ।

नृत्तलक्षण

विनाभिनयभावाद्या विहीनं नृत्त कथ्यते।।५२

रसभावान्वियेनृत्यं रतिनृत्यमितीर्यते।
लघुर्वाताण्डवेचैव रतिमित्यभिधीयते।।५३

रतियुक्तेन लास्याङ्ग उग्रता प्राप्यतेध्रुवं।
कौशिकीवृत्ति संपन्ना सदाललित मानसा।।५४

लघुनृत्योत्तमे नारीश्रेष्ठा प्रहृष्टचेतसा।
आरभटी वृत्तियोगेन उग्रं पौरुषलक्षणम् ।।५५

ताण्डव लक्षण

द्विविधंताण्डवख्यातं पेवलि बहुरूपका।
पेवलिबन्ध नृत्याङ्ग विषमा अङ्गचालना।।५६

योजनाकरपादाभ्यांद्रुता विक्षेपकारणात् ।
लास्याङ्गप्रान्तभागेन अन्तताल समागमे।।५७

यौवनेघ्नुवयुक्तेन नृत्यन्ति नृत्यवेदिनः।
बुहरूपाख्यनृत्येन हावभावादि लक्षणम् ।।५८

छेदनादिकटिपादाः करन्यास प्रयोजनं।
पेवलिउग्रनृत्याङ्गं लीलाग्रे प्रान्तदर्शने।।५९

उड्डदेशे वीणाकार लीलासूत्र धरंयथा।
दण्डनृत्ये तथा पुंसः दण्ड कार[१] विचक्षणः।।६०

सव्यांशे तालधारीच मृदङ्ग वामदक्षिणे।
मृदङ्गमुत्तरेतत्रकांस्यताल द्वयंतथा।।६१

तयोर्मध्येनटीरम्ये पेलविनृत्यचारिणी।
पेलवि वा उद्धटीवा कुतपं मुख्य सर्वदा।।६२

लास्येनकुतपः श्रेष्ठः वटुनृत्येच मण्डलं।
रङ्गप्रवेशमात्रेण कर्त्तव्यं रङ्गमण्डले।।६३

प्रस्तावनाक्रमे नृत्य लीलाविषय वर्ण्णना।
उत्सवेव्यसने चैव युद्धकार्य्य महोत्सवे।।६४

---

१. M.S.S. 2 बीणाकार

पेलविबन्धरूपासा सर्वदाजनमोहनं।
वहुरूपा तथा यशुद्ध उग्रं महेश्वरप्रियं।।६५

साभिनयसमायुक्ते पूर्वरङ्गमनुश्रुते।
मुखताल समान्याय वाद्यताल समाश्रिते।।६६

शिववेशधरः पुंसः अथवा नागरि स्वयं।
कथितंताण्डवंमेढ़ नानारूपधरात्मकः।।६७

अष्टं वा दूशभुजं वा ललाटंतिलकाकृते।
बहुरूपात्मिका नृत्ये बहुधाशङ्करावृति।।६८

सप्तताण्डव नामानि

आनन्द कालिकागौरी सन्ध्या पार्वती एवच।
त्रिपुराताण्डवंउग्रे संहार एव सप्तधा।।६९

एवंनाना,वृत्तेरङ्गे उग्रनृत्य मनोहरं।
पूर्वरङ्गानुसारेण करे हार समन्वित।।७०

वहुधानाम कल्पन्ते नृत्यार्थी नृत्यभेदतः।
करन्यास समायुक्त पदन्यास समाश्रिते।।७१

बहुधाकरणन्यासः कर्त्तव्यं उग्रनर्त्तने।
एकहस्ते सममुद्रा समक्षेत्राङ्ग दर्शने।।७२

मातृकादि वरण

मातृकाइति सख्यातः पक्षेन उपमातृका।
वेदहस्तसमायुक्ते करक्षेत्र कलापक।।७३

वन्धवंयुग्महस्तेन वाणे संघात एवच।
महाघात तथा षष्ठे समुद्रे मण्डलाङ्कितं।।७४

नृत्य की विभिन्न मुद्राएँ





साहित्य सम्मेलन प्रयाग (इलाहाबाद) से सम्बद्ध)
कार्यालय: बी-2/215, पश्चिम विहार, नई दिल्ली - 63



शिव का तांडव नृत्य

पर्य्यायानुक्रमे न्यासः कर मुद्रा सुशोभनं।
बृश्चिककरमुद्रांच भूजङ्गाश्रित साम्भव।।७५

ताण्डव करणानि

अर्द्धसाम्भवसंयुक्ते तल संपूट चारिणी।
लुलितावलिताचैव गुध्रावली तथैवच।।७६

करिहस्तास्वस्तिकंच अर्द्धस्वस्तिक ज्वालिनी।
वरदंआश्रिताचैव चतुरः सौम्यदायकः।।७७

वुंञ्जरवक्त्ररूपाच कर्षणाचार्द्धकर्मठा।
करछत्र महामुद्रा नूपुराज्ञानकर्षिणी।।७८

एकविंशति मुद्राणि वटुनृत्ये शुभप्रदं।
उद्दण्डे समदोर्दण्डे छन्दनेभेदने तथा।।७९

नर्त्तने व्यसनेचैव ताण्डवं शुद्धनर्त्तनं।
मर्द्दलतालयुक्तेन टंकारतन्त्रीशोभितं।।८०

प्रेक्षातालंतथासौम्य अनुतालातिराधवं।
कांस्यतालादि युक्तेन पुंनृत्यं जनरञ्जकं।।८१

वुश्चिक

श्रुणुत्वं करन्यासानि नृत्यार्थीज्ञानवैभवं।
पादाम्यां कुञ्चितातत्र अथवा अर्द्धकुम्भवत्।।८२

शिरोर्द्धपल्लवाभ्यांच पल्लीपृष्ठोर्द्धदर्शिते।
समाकारेभूजाःसर्वे अंगुलिधरर्णीप्रति।।८३

शिरोर्द्धमण्डलेमुद्रा वृश्चिकंतत् प्रकीर्त्तितं।
विक्षिप्तपादयुक्तेन अर्द्धस्वस्तिक मासने।।८४

ध्यानमुद्रासममेवं संमुखे दण्डदर्शनं।
कटिंजानुश्रुतैअंगंत्रिभंगभगी भंगीमा।।८५

अपरंकर संस्थाप्य दण्डे यथावलम्बनं।
मणिबन्धोपरिबन्धं भूजंगाश्रित लक्षणं।।८६

बक्षपार्श्वोत्तमक्षेत्र आरभेत नट पुंगव।
करद्धय पार्श्वक्षेत्रे लम्वाकारेण संमुखे।।८७

साम्भव

समाकारेद्धयो:पल्लि पूर्ण्ण साम्भवमुच्यते।
भूजैकलुलिताकारे सम्भवाकृतिमाकृतिं।।८८

अपराध्यानभावे वा योगंवा आश्रितोपमः
वामांघ्रिकुञ्चितंकुत्र दक्षिणंकुञ्चिताधिके।।८९

तलसंपुटिताहस्तौ उर्द्धवेवा करचुम्बिते।
एककरं सदा सव्ये अपसव्येतथैव च।।९०

अर्द्धसाम्भव

अर्द्धसाम्भवयोगेन तालानुस्रुतमाचरेत् ।
शिरोर्द्धे उर्द्धवगा पल्लि पार्श्वगे अपरातथा।।९१

लुलिताकरयुक्तेन ताण्डवे च मनोहरं।
कटिदेशोपरिन्यस्तं वामे वा दक्षिणेन च।।९२

अपरापार्श्वक्षेत्रेण अभयादि समाश्रिते।
हस्तमेकंपार्श्वक्षेत्रे लम्बाकारेणनिम्नगा।।९३

अपराशिरपार्श्वेच पताककरयोगतः।
उर्द्धवकरसमायुक्ते सूचं वा नागमस्तकान् ।।९४

गुध्रावली

संदर्शयेत् सुयत्नेन कर्त्तव्यंनृत्यवेदिनः।
गुध्रावली इतिख्यातः ताण्डवे सौम्यदर्शनः।।९५

शृणुत्वंसविधिः मार्गं कुंजरवक्त्रलक्षणं।
बृश्चिककरभावेन करमेक प्रदर्शनं।।९६

अन्याचपार्श्वदेशे च लुलिता साम्भवोपमा।
हस्तागुंलिसंमुखेच चुम्बिते सूचीमुखवत् ।।९७

कुञ्जरवक्त्रा

करिहस्तं तु कर्त्तव्यं उग्रे नागारिनर्त्तने।
रेचितंस्वस्तिकं श्रेष्ठाकराम्यां कटि सन्निधौ।।९८

स्वस्तिक

अर्द्धकुम्भाकृते पाद अथवाकुञ्चिताकृते।
कराभ्यांवृश्चिकोन्याये कट्योर्द्धमण्डले तथा।।९९

अर्द्धस्वस्तिक

शुद्धस्वस्तिकएतेषां नारीनृत्ये विशेषतः।
हस्तमेको यथापूर्ब अपरोवृश्चिकोपमः।।१००

अर्द्धस्वस्तिकसौ मुख्यः वटुनृत्ये मनोहरः।
व्याग्रपल्लिसमपल्लि विक्षिप्तचतुरांगुलि।।१०१

सम्यक्न्यूनतरे वक्रं अंगुलि पल्लवंप्रति।
ज्वालिनीकरमुद्रासा उग्रनृत्येप्रयोजनं।।१०२

अभयाकरयुक्तेन शिरोर्द्धे वरदंभवेत् ।
आश्रिता कटियुक्तेन अंगुष्ठंकटिपृष्ठगा।।१०३

संमुखेऽन्यानिसर्वाणि किञ्चिन्न्यूनतलावधि।
केवलंएकपार्श्वंच त्रिभंग्यासन स्वस्तिके।।१०४

नकुर्य्यादुभयोपार्श्वे लास्याग्रे न कदाचन।
छत्राकारे करमेकं अपराकटि पार्श्वगे।।१०५

ध्यानमुद्रा समायुक्ते उत्तानपद लक्षणं।
छत्रहस्तयदापार्श्वे तत्पार्श्वेकुञ्चितापद।।१०६

चतुरं

दृष्टिध्यानकरान्यस्ताचतुरं सा शुभप्रदा।
एकहस्तसमायुक्ते गजशुण्डाकृतिं महत्।।१०७

क्षिप्तपादादियुक्तेन नर्त्तने सौम्यदर्शनं।
छत्राकारेकरमेकंपृष्ठे वा तल पल्लवे।।१०८

दण्डछत्र

दण्डछत्रसौम्यछत्रंनामतः द्विविधोमतः।
भूजदण्डाकृते उर्द्ध्वेकेवलं पल्लिछत्रवत्।।१०९

दण्डछत्र इतिख्यातः ललाटतिलकोत्तमे।
वक्रेणभूजशिरोर्द्धेतलोर्द्धंदर्शितं परां।।११०

सौम्यछत्र

सौम्यछत्र इतिख्यातः उग्रनृत्ये मनोरमं।
कुटिलपादयोगेन दण्डवत् करपल्लवाः।।१११

पक्षाकारे उभयो पार्श्व लम्बाकारेसमन्ततः।
अर्द्धचन्द्राकृते पल्लि निम्नगा अंगुलिं सदा।।११२

नूपुरंताण्डवे श्रेष्ठंलास्येक्वचित् सुखावहः।
नृत्यखण्डंयथाकारे तादृशंज्ञानपल्लवं।।११३

उग्रेच सर्वदाश्रेष्ठः उग्रमुद्राइतीर्यते।
अधुनात्र प्रवक्षामि वटुनृत्यांगभावना।।११४

रतियुक्ते मनोग्राह्यं मुद्राभङ्गी सदाध्रुवं।

महाशाभाव

बुश्चिकोव्यापृताभावेच्छेदने छादने तथा।।११५

स्थितिभावात्मकन्यासः गर्भस्थ इतिज्ञापकः।
स्थितिमुख्यइतिभावःताण्डवे सौम्यदर्शनं।।११६

सर्वाच्छादनरूपेण कर्त्तव्यंवृश्चिकोत्तमा।
भुजङ्गाश्रित्यमाश्रित्य वध बन्धन नैत्तिका।।११७

स्थितियोगात् प्रसङ्गेन कान्ति सौष्ठवईक्षणे।
अनुरक्ति सानुबन्धे निर्बन्धे अभिचेतने।।११८

भुजङ्गाश्रित स ख्यातः पार्श्वक्षेत्रे विधानतः।
साम्भवालम्बनेश्रेष्ठः व्याप्तिभावान्वये सदा।।११९

परिव्याप्तेसदापार्श्वे साम्भवंव्याप्त लक्षणा।
अर्द्धसाम्भव स ख्यातः द्विविधोन्यास मार्जितः।।१२०

एकोसव्यापसव्येन अपसव्यंच दक्षिणे।
सहमुद्राकृते अन्याशिरोर्द्धे न्यासितंध्रुवं।।१२१

एवंन्यासक्रमयुक्ते सर्वदा मुक्तलक्षणं।
चलत्क्रियोद्धवभावे गतिर्गर्वित मानसे।।१२२

उत्ताननृत्यभावेन आचरेत्चार्द्धसाम्भवं।
तलसंपुटितो सव्वे उन्मादलास्य नर्त्तने।।१२३

तालभङ्गक्रमे न्यासेत् भङ्गीमानन्द दायकः।
आच्छादयति सा माया यः शिवस्य कलात्मकः।।

विस्तारंभवति यत्र तत्र तत् सृजनं महत् ।
परिवृतार्थशिरोर्द्धे सृजनार्थेच साम्भव।।१२५

सदासृष्टिप्रदादर्शे कर्त्तव्यंलुलितं महत् ।
करक्षेपण युक्तेन दृष्टिभङ्गी समाचरेत् ।।१२६

नटीप्रदर्शयेत् भावंकरयोगे विशेषतः।
काव्यशास्त्र विनोदेन शब्दादिरस चिन्तनं।।१२७

अष्टादश दृष्टि

नेत्रभङ्गी तथा भावे बहुधा नट लक्षणे।
भोगतीर्यक् उर्द्धवदृष्ट अङ्गार्द्धभूमि संश्रवा।।१२८

स्थिरा अवनताचैव कुञ्चिता घूर्णिता तथा।
मुद्रिताशिवनेत्रंच चालितास्तम्भिता जया।।१२९

एता अष्टादशा नेत्र नृत्ये भावप्रदायिनी।
स्थायीभावेतथादिव्ये व्यभिचारे विचक्षणा।।१३०

ननेत्रभावप्रत्यक्षे सात्विक भाव दर्शने।
देवालये उत्सवे च पटुआरे विशेषतः।।१३१

सेवाकाले न कर्त्तव्यं विविधं दृष्टिभावना।
रङ्गालयेगणेसंधे विचित्र नृपमण्डले।।१३२

नाट्यारम्भे तथामध्ये नृत्य दृष्टिंसदाचरेत् ।
शृणुत्वंदृष्टिभेदेन नेत्र न्यास सुनिर्मलं।।१३३

नेत्रन्यासविना नृत्यं नृत्तं भवति निष्फल।
स्थिरालपनयुक्तेन केवलं पितुलाद्वयं।।१३४

भोग

पादभूमिसमाबद्धे भोगदृष्टि मनोहरं।
आह्वानापेक्षस्थैर्य्येच पराङ्मुख विचक्षणे।।१३५

भोजनग्रहणे सौम्यभागदृष्टिः सदाचरेत् ।
पार्श्वेतिर्यक्मुखं पार्श्वेनेत्रकोणेडोलादयः।।१३६

तिर्यक

दृष्टिसंपूर्ण्ण पार्श्वे च तिर्यक्दृष्टिः स कथ्यते।
सनधानेविह्वलार्थेच मुग्धे च प्रेमभाषणे।।१३७

उन्मादभाव युक्तेन तिर्यक्दृष्टि नटीचरेत् ।

उर्द्ध

संमुखे स्थिरमुखेन उर्द्धवदृष्टिं नभंप्रति।।१३८

नेत्रपट्टस्वयंशान्तःचञ्चलं पितुलाद्वयं।
प्रशान्तव्याप्तभावेन शून्यभाव प्रदर्शने।।१३९

सूररङ्गालयार्थेच नभे वारिवहागमे।
किञ्चित् वक्त्रान्वये मुण्डपार्श्वेस्वगात्र दर्शने।।१४०

अर्द्धाङ्ग

देहपार्श्ववलोके च अर्द्धाङ्गदृष्टिमाचतरेत् ।
प्रेमावशे विक्रितेच नृत्यारम्भे च क्रीडने।।१४१

श्रवणानुरते मुग्धभावे अर्द्धाङ्गलोचनं।
वक्राङ्गयोगसंयोगे कुटिलपादमाश्रिते।।१४२

तलदृष्टिभूमीसंश्रव

पार्श्वेसंमुखभागेन दृष्टिंतलमुखान्वये।
गुल्फोमुखीमुखस्तत्र दृष्टिंभूमौपरिस्थिता।।१४३

एवं, नेत्रोत्तमभाव भूमिसंश्रव लक्षणः।
भग्नभावे संग्रहे च बिषमे तालभञ्जने।।१४४

अनुनत्त इतिवाक्ये शिशुलालन तत्परे।
भूमिसंश्रव युक्तेन नतदृष्टिर्मनोरमा।।१४५

नृत्यप्रान्ते तथाबन्धे कर्त्तव्य नटीमाचरेत् ।
एकपार्श्वाच्च निगृह्य अपरपार्श्व दर्शने।।१४६

इतस्ततःक्षणं दृष्टिः पार्श्वे अपाङ्गचालनं।
विद्युतप्रकाश दृश्येन अपत्यस्नेह माधुरी।
चक्षुणासाक्षणदृष्टि क्षत्रमात्र प्रदर्शने।।१४७

चपला

निर्द्देशरोधभावेन चपलानेत्र मुख्यतः।
चपलाचपले चेति नृत्यमानन्द दायिका।।१४८

विष्फारिता

विष्फारिता सदा उग्रं उग्रं विकट दर्शने।
अद्भूते विस्मिते चैवष्फारिता विरहोत्तमा।।१४९

स्थिरा व्यग्रा

स्थिरानेत्रद्वयेतत्र पितुलाचक्रवत् तथा।
पितुलाचालनेव्यग्रे व्यग्रभ्रावेनुत्तमः।।१५०

आलोडने न कर्त्तव्यं अतिकोपान्वयेतथा।
घर्षणे वा मर्द्दने वा अभिव्यक्ते मनोरमे।।१५१

अभिताड़न युत्तेःन तिरस्कार प्रदर्शने।
व्यग्रा व्यग्रतरा दृष्टिः सदाव्यग्र प्रदायिनी।।१५२

कुञ्चितादक्षिणानेत्र वामाविष्फारितातथा।
पार्श्वदृष्टि सदानृत्ये भय मानस द्योतका।।१५३

विपद्ग्रस्ता नृपत्रस्ता क्षुब्धा उद्विग्रमानसा।

आतुरा

एतेसर्वे भावयुक्ते आतुरा लोचनाध्रुवं।।१५४

अर्द्धस्फारिता

पार्श्वक्षेत्रेभ्रुवोयुक्ते भूमिदृष्टि विधानतः।
अर्द्धोन्मिलित नेत्राभ्यां कथिताचार्द्धस्फारिता।।
पार्श्वयुक्तेद्वयोःपार्श्वे नृत्यप्रारम्भकालीने।
नेत्रइति सुविख्यातः आकर्षभाव सन्निभा।।१५६

प्रेमाकाङ्क्षारतिक्रान्ता आकर्षा कर्षणप्रिया।
संमोहिता इतिभावे नेत्रं कर्त्तव्य नर्त्तकी।।१५७

विस्फारिताभ्रुवोर्मध्ये स्थिरा पुत्तलिकाद्वयं।

स्थिरा

सानेत्र कथिता स्थिरा स्तम्भीभूत क्रियावली।।१५८

स्थिरागम्भीर चकिता सदा आश्चर्य भाविनी।
अद्भूतश्रवणे स्थिरा क्रोधिते रतिभङ्गने।।१५९

मुखसञ्चालने भव्ये संमुखे च पुनः पुनः।
संमुखेनतभावेन पुनः उत्तोलिते तथा।।१६०

तत्सहालोचनाभावे नभोमुक्त क्षणं क्षणं।
मध्येनर्त्तन कर्त्तव्यं अवनता लोचनं सुधी।।१६१

क्रीडामयी नटी क्रीडा मुख्य नृत्यमहोत्सवे।
प्रतितालान्वये हस्त कर विक्षेप सुन्दरं।।१६२

मूर्च्छनातालयुक्तेन दर्भयुक्त? क्रीडास्थले।
मुख्याऽवनतादृष्टिः (भ्रूयुगं कुश्चिताचार्द्धमुद्रिता)
उभयोर्नयनेप्रान्ते कुश्चितालोचनद्वयं।।१६४

पार्श्वक्षेत्रगतादृष्टि भ्रूयुगं चार्द्धमुद्रिता।
मधुरभर्त्सनाक्रोध प्रेमविरह घातिनी।।१६५

निर्द्देशभाब सश्रेष्ठः हृदयोद्वेगमानसे।
स्फारिता भ्रूयुगोर्मध्ये घूर्णिता पुत्तलिद्वयम् ।।१६६

बन्धेनृत्ये सदारम्यं दीपनृत्ये विशेषतः।
सन्धाने लाडने नृत्याक्षिप्तताल प्रदर्शने।।१६७

स्फारितादृष्टि कर्त्तव्या दर्शकानन्द वर्द्धकं।
मुद्रिता
मुद्रिताध्यानरूपा सा सुप्तभाव प्रकाशिनी।।१६८

काव्यानुगत वाक्येन कर्त्तव्यंनाट्यवेदिनः।
अर्द्धोन्मिलित भूरुभ्यां पितुला उर्द्धवगामिनी।।१६९

अर्द्धदृश्याडोलास्तत्र शिवनेत्रा मनोहरा।

शिवनेत्रा

निमग्रा भावयुक्तेन तल्लीना ईश्वरं प्रति।।१७०

योगी योगरता भावे दृष्टि नृत्ये विधियता।
स्वाभाविक मुखे नेत्रे स्वभावा नयनद्वयं।।१७१

नृत्यमुद्रासहभिन्न क्षेत्रे चालनपेक्षिणी।
चालितादृष्टिः सा सिद्धा केवलंकरचालने।।१७२

हस्तकादि समायुक्ते भिन्नाभिन्नः स जायते।
स्वाभाविक नेत्रयुक्ते केवलंश्रवणेरतं।।१७३

एवंभावान्वयि दृष्टि स्तम्भिताकथिता सदा।
अष्टादशदृष्टिभेदे भावंलयानुसारिणी।।१७४

नेत्रापांगइति श्रेष्ठं नृत्यज्ञान विभूषणं।
विनादृष्टि मुखाल्लास भावादि निष्फलंध्रुवं।।१७५

दृष्टिर्लपनवक्षे, च कटिपादकरद्वये।

नृत्यषड़ाङ्ग

भावंसन्दर्शयेत् नित्यं षडांग अंगभावना।।१७६
विनाषडंग ज्ञानेन नृत्यंदेशि स जायते।
श्रृंगारवीरकरुणोहास्यरौद्रोभयानकः।।१७७
विभत्स अद्भूतोशान्तः सर्वेषड़ांगपेक्षिणः।

नेत्रमुख्यतरं नृत्ये मुखभावप्रदायकः।।१७८
हास्यक्षुब्धंच व्यादान रुद्धं विकटमेवच।
लुलितंक्षिप्त लपनं स्फारितंनम्रमस्तकम् ।।१७९

नवमुखभेद

भावरसादिसंयुक्तेः नवधामुखमाचरेत् ।
लास्यहास्यमयं श्रेष्ठं अधरे पार्श्वदर्शने।।१८०

अधरप्रान्तभागेन कुञ्चिता अधर द्वयं।
क्षुब्धोलुब्धक प्रेमांग शृंगार भावधारिणी।।१८१

ओष्ठद्वयं समोभागेऽवनता संमुखादपि।
प्रसारित ओष्ठद्वयोः व्यादानं च भयानकं।।१८२

रसनाकुञ्चित गर्भे व्यादानंमुखलक्षणं।
ओष्ठद्वय समाबन्धे वीरभाव प्रदर्शने।।१८३

रुद्धमुखंसदाउग्र नर्त्तनेताण्डवे सदा।
विकटमुखकूटेन पृथक् वा मिलितेनवा।।१८४

दंशनदर्शनघोर रौद्रभावसमान्विते।
नतोष्ठद्वययुक्तेन लुलितंअधरंप्रति।।१८५

लुलित करुणनृत्ये तापसन्तापज्ञापिनी।
क्षिप्तविभिन्नदशनां स्फारिता कुञ्चितातथा।।१८६

भिन्नक्षेत्र गताओष्ठंविभत्सरसमाश्रया।
स्फारितेओष्ठदशनं इतस्तंतांगचालनं।।१८७

नानाभंगीसमाश्रित्य अद्भूतोरस स मद्भूतं।

नवधामुख

नम्रप्रशान्त बदन निर्विकल्पो समंमुखः।।१८८

शान्त रसज्ञ नम्राख्य मुख लक्षणमुत्तमं।
नवधामुखसंख्यात नृत्यार्थीरसज्ञपने।।१८९

नेत्रमुखद्वयोर्युत्तेः भावंप्रवृत्ष्टजायते।

वक्षभेद

मुखसमान्विते वक्षं ख्याता त्रिविध कामतः।।१९०

भद्रंसव्योऽपसव्येन नृत्यार्थी वक्षभूषणं।
भद्रसंमुखयोगेन सव्यासव्यानुगा तथा।।१९१

अपसव्यानुगावामे चालितो भयपार्श्वयोः।
कटिलक्षण चत्वारः स्थापनिक्रमभेदिनः।।१९२

कटिचत्वारि

वामातुं गदक्षतुंग उत्तुंग तलतुंगिका।।
कटिस्थाने कटिन्यासः तेषां वक्षामि लक्षणं।।१९३

एषवैनृत्य अंगच ज्ञातव्यंनृत्यवेदिनः।
बामकट्योपरिभाग अपसव्येनतोलिता।।१९४

सव्येसव्यकटि न्यून वामतुंगविधानतः।
कटिदेशे समाकारे दक्षिणे पूर्ववत् सुधीः।।१९५

सव्यतुङ्ग इतिख्यातः कर्त्तव्या सा विधियतेः।
समभागेकटियुग्मो सौम्यसंमुखदर्शने।।१९५

समतुङ्गेन उतुङ्ग नृत्यार्थी मोददायकः।
निम्नगा तल चुम्बि सा विक्षिप्ता विपरीतगा।।१९६

विक्षिप्तभावचरणा क्षिप्तनाभि प्रतिष्ठिता।
बन्धनृत्ये सदारम्यंतलसंपुट चारिणी।।१९७

कटिचतुर्विधा मुख्या उग्रेलास्ये विशेषतः।
कट्यानुसारिणी पाद ताल पादानुभाविनी।।१९८

चतुरपादन्यासंच कुम्भदण्डंच सायकं।
विषमन्यास एतेषां मुख्यांध्रि नृत्तनर्तने।।१९९

भूम्यानुसारिणी पादः पादानुघातिकः गति।
कट्यानुसारिणी भंगी अपरे किं प्रयोजनं।।२००

वामतुङ्गानुयुक्तेन सायकपादमुत्तमं।
दक्षतुङ्गेतथान्याये सव्यदेशे मनोहरे।।२०१

समतुङ्गसमायुक्ते कुम्भदण्डंतथैवच।
विषमाबहुधासर्वे तल संपुटगामिनी।।२०२

भरतादिकृतेशास्त्रे चतुरः स्वस्तिकादयः।
सर्वेचतुरन्यासेन जायते नात्र संशयः।।२०३

नृत्यारम्भे च प्रारम्भेदण्ड पादादिमाचरेत् ।
काव्यवाक्य प्रकाशेन दण्डपाद विगर्हितं।।२०४

नर्त्तने कुम्भहि श्रेष्ठः अभिताल प्रदर्शने।
कुम्भमुख्यसदानृत्ये सर्वभाव समन्वये।।२०५

सायक युग्म नृत्येन वाक्यालापे परस्परे।
उपर्य्युपरि पादाभ्यां संचालयेत नर्त्तकी।।२०६

विषमबहुधानृत्ये छन्दोबन्धे सुशोभिता।
*ललाटतलगले बन्धे उत्तालतालदर्शने।।२०७

रससंयुक्त पादाभ्यां सर्वेभावानुसारिणी।
दण्डपादे सदाशान्तं करुणहास्यदर्शयेत् ।।२०८

कलशेरुद्रश्रृङ्गारः चापे वीर रसात्मकः।
विषमे अद्भूते भीतौ विभत्सरस दर्शयेत् ।।२०९

रसयुत्ते सदापाद पाद संयुक्त गायने।
गायनानुसृतो हस्त एतानिधत्स्व धारणा।।२१०

सस्व, निरव, भेदः
द्विविध लास्ययोर्मध्ये निरवं सरवं तथा।
सरवे सरसेवाक्य निरवे निष्प्रयोजनं।।२११

निरवे मुख्यदृष्टिनां हस्तेन चारिणादयः।
सरवं हस्तयुक्तेन दृष्टिवाक्य विनोदनं।।२१२

क्रमेणैवं सदानृत्य देवतानन्द वर्द्धकः।
मुक्तिप्रदंसर्वकाम स्वर्गमोक्ष प्रदायकं।।२१३

सरवोनिरवो नृत्ये नृत्य संघातमण्डले।
वाद्यादि सहिते वाक्य करमुख्य विशेषतः।।२१४

काव्य वाक्यगते भव्य दृष्टिमाकर्षणोत्तमं।
कटितालानुभावेन पाद मानास्रूतं तथा।।२१५

---

* ललाटतिलक

सर्वेभावगताः सर्वे वाद्य वादित्रशोभने।
मण्डलानुगते वाद्यं नट्यादिगायकादयः।।२१६

शुद्धमण्डल युक्तेन गायकी सुन्दरीनटी।
समागानरतानारी तिष्टन्तिवाद्यकारिणः।।२१७

त्रिविधमण्डलं

मण्डलंत्रिविधोश्रेष्ठं उत्तमोमध्यमोधयमः।
उत्तमेन सदा श्रेष्ठं नर्त्तकी नर्त्तनप्रिया।।२१८

चत्वारो वादको श्रेष्ठः मृदङ्ग कांस्यतालिका।
वीणावाद्यरता रम्या नायिका समगायिका।।२१९

एवंपञ्चजनै र्युक्तैः उत्तमं मण्डलंविधि।
लास्यनृत्ये सदाश्रेष्ठः राजराजगणः प्रियः।।२२०

मध्यमे उत्तमानारी नर्त्तकीदिव्यभूषिता।
मृदङ्ग कांस्ययुक्तेन उत्सवे हरिकीर्त्तने।।२२१

वहुनर्त्तकीयुक्तेन वहुवाद्य परिवृत्ते।
मृदङ्गकांस्य वीणाद्या पट्टह तालपट्टिका।।२२२

एवं नानाविधो वाद्यं वह्वोपगायिकागणाः।
सहरासादि नृत्याङ्ग अधमो मण्डलैःसह।।२२३

रासोल्लासविलासादि अङ्गविक्षेपपेक्षणी।
मात्र सुनृत्य युक्तेन हस्तभावविचक्षणां।।२२४

हस्तन्यास सदाश्रेष्ठः लास्येसात्विकभाषणे।
शृणुतं हस्तभेदानां भावानुश्रुत सर्वदा।।२२५

पूर्वाध्याये यथाउक्त ध्वजादि हस्तकं क्रमात् ।
तथान्यायेश्रृणु न्यासंभावज्ञानानुसारतः।।२२६

ध्वजादिहस्तक प्रयोगविधि

ध्वजहस्तसदाश्रेष्ठा लास्येउग्रेविचक्षणा।
नानाभावमयंहस्तनृत्यार्थीमोददायिका।।२२७

ध्वजहस्तसमायूक्ते पार्श्वे संमुखे एवच।
पृष्ठेपृष्ठरते उर्द्धव नानाक्षेत्रे प्रदर्शयेत् ।।२२८

नृत्यारम्भकृते पार्श्वे कम्पयिता क्षणे क्षणे।
मेघागमे द्वयोःहस्ते मण्डलाकृति दर्शयेत् ।।२२९

अरण्यदर्शने पार्श्वे आवृत भाव लक्षणे।
एकहस्त समायुक्ते निषेधभावज्ञापिका।।२३०

मदनार्त्ति रतिभावे कुचसन्धि प्रदर्शनं।
एकपार्श्वान्तिमारभ्य अपरान्त जलागमं।।२३१

हस्ताद्वयसमायुत्ते हृदक्षेत्र समन्विते।
केवलंवृत्तमध्येन पल्लिममर मण्डने।।२३२

कुरङ्ग खण्डनेभावे एकतिर्यक्प्रदर्शनं।
मरुतागम व्यक्तेन एकहस्तेन चालनं।।२३३

शयनरतिभावेन कर्ण्णपुटे च पल्लवा।
गमनोद्गमने वाम पल्लवे दक्षिणायनं।।२३४

प्रतापे च द्वयोः पार्श्वे निम्नगा अङ्गुल्या सह?
प्रसादे अंजलिबद्धे चन्द्रिका उर्द्ध्व दर्शने।।२३५

क्षिप्तताले एकहस्तात् विक्षिप्ताङ्गुलिदर्शनं।
क्षणे क्षणे पार्श्वदेशे आरूह्यहृदयस्थलं।।२३६

गन्तव्ये वामपार्श्वेच दक्षिणे अचलासने।
परस्पर द्वयोर्युक्ते स्थिरभाव प्रदर्शनं।।२३७

शीतलभाव संदर्शे रति विपरिता वृते।
प्रसन्नहृदयार्थे च एक सम्यक्शिखोपरि।।२३८

आह्वान रति मुख्ये च नृत्यमध्ये सुशोभनं।
पार्श्वमानीयहस्ताद्यैः पल्लवंहृदयावधि।।२३९

एतानि ध्वजसंयुक्ते नानाभाव समन्वये।
देशभेदे तथाचारे नानाभावे पृथक्पृथक्।।२४०

सर्पशिराप्रयोगः

रम्यासर्पशिरानृत्ये नानाभाव प्रदर्शने।
लज्जावनतभावेन कर्ण्णपार्श्वेमनोरमा।।२४१

संमुखपार्श्वभागेन हृदय पार्श्व दर्शने।
प्रतीक्षाप्रेमविषये हस्तकः श्रेष्ठ कथ्यते।।२४२

स्थिरेणैक पल्लवेन अपरे कर्षचिन्तने।
आनयन् अन्यभावेन करणीयं क्षणे क्षणे।।२४३

दोलायमान अर्थेन पार्श्वेपल्लिद्वयोर्द्धवगा।
आकुञ्चिते प्रसारेच काव्यवाक्य विनोदने।।२४४

ललित करणेरम्यं मुग्धभावे मनोरमं।
सव्यपल्लि कटिक्षेत्र उर्द्धवगा अङ्गुलिद्वयं।।२४५

अपसव्योर्द्ध युक्तेन शीरदेशे च निम्नगा।
उत्तोलित पदभागे दक्षोत्तोलन तत्परा।।२४६

मोहने मोहनाभङ्गी सर्पशिराकरद्वये।
एकंहृदयपार्श्वेच संमुखे पल्लिदर्शनं।।२४७

अपरे अपरपार्श्वेलुलिता निम्मगांगुलि।
धनुपादांगयुक्तेन मोहनं नृत्यभूषणं।।२४८

वक्रेपार्श्वे गुल्फभूमौपरि पल्लिप्रदर्शयेत् ।
अपराउर्द्धवदेशेन शिरदेशे विमण्डिता।।२४९

मूर्च्छनाभाव इत्येवं सर्पशिरा करान्वये।
कल्पना भीषण रिक्ता अनुरागप्रदर्शने।।२५०

वलयाप्रयोगः

वलयालास्य योगेन कपित्थकथिता पुरा।
दृढ़भावेमृषाभावे अनिच्छापृष्ठ चिन्तने।।२५१

अनुबद्ध समाबद्धे अगुंष्ठं तर्जनीसह।
युक्ते युक्तिगत वाक्ये भावार्थअर्थदीपिका।।२५२

उत्तरीयधृते नृत्ये पार्श्वेसंमुख दर्शने।
वलयबद्धभावेन स्थिराभाव प्रधानतः।।२५३

ध्यानप्रयोग

ध्यानतद्गतभावेन ध्यानाध्यान विमाहिते।
अनुध्यान प्रबोधेच ध्यानपल्लि स उत्तमा।।२५४

प्रबोधिता तथाकारे विपरीतांग दर्शनं।
नानाभावे गतिर्हस्ते तदानुमित्र पल्लबा।।२५५

अङ्कुशाताल नृत्येन कटकामुख विस्तरात् ।
सहिसंकुचितो भावे मित्र भावानुसारिणी।।२५६

दीक्षाशिक्षाद्वयोः भावे दण्डपार्श्वगतेध्रुवं।
उग्रनृत्ये चिन्तनार्थे सँदातत्र प्रदर्शयेत् ।।२५७

मुद्रादृष्टिसमाबद्धे घूर्णिते नृत्य मध्यमे।
आवर्त्ततिभावेन नटी आनन्ददायकः।।२५८

लुलिताद्वयपार्श्वेन एकमुखा च पल्लवा।
मुद्रायुक्ते इति मुद्रासौम्यंसौभाग्य दर्शने।।२५९

संमुखेरोहणतीक्ष्ण दोहण विषमावृत्त।
लुलितकर योगेन नृत्यं सबाँगसुन्दरं।।२६०

निषेधानास्तिभावेन विरोधात्मक चिन्तने।
प्रेमाभिव्यक्ति योगेन मुद्रा लास्ये प्रयोजनं।।२६१

ताम्रचूडाकृत पल्लि उत्क्षिप्तभावपोषणे।
मुद्रितंस्फन्दितंभावे क्षिप्तांगुलिक्षणे क्षणे।।२६२

निषेधापार्श्वदेशेन काव्यानुश्रुत लक्षणे।
धिक्कारा पल्लिसख्यातः समभावानुसारिणी।।२६३

सूचीमुखाकृतिहस्त भरतशास्त्रसम्मतः।
निर्देशसूक्ष्मभावेन मुद्रा परिचयात्मकः।।२६४

हंसाख्यकरयोगेन उपचारादिधारणे।
नायकानुगते सम्या नायिकाप्रेमदायिका।।२६५

इति समगता मुद्रा हस्तभाव प्रचारिका।
असमवृत्ति योगेन शृणुत्वं पुटिताक्रमम् ।।२६६

हंसपक्ष इति मुद्रा पार्श्वेनृत्य समागमे।
उड्डीयमान भावेन क्षीणनृत्याङ्गभावतः।।२६७

पार्श्वदेशे नृत्यमध्ये मूर्च्छना लक्षणान्विते।
विक्षिप्तभाव-योगेन तालमानसमाश्रये।।२६८

प्रेरणाचोदना क्षिप्ता विक्षिप्ताङ्ग प्रदर्शने।
प्राप्तेशून्यघटाग्राह्ये घनवारिघनागमे।।२६९

वाद्यतालसमायुक्ते कंपने भयसूचिते।
हंसपक्ष सदापार्श्वे उर्द्ध्व वा पार्श्वमण्डले।।२७०

गोमुखा मुख्यभावेन तालयुक्ते मनोरमं।
प्रेक्षाभावे क्षिप्ताभावे प्रशान्तभावदर्शने।।२७१

सन्धाने उग्रभावेच ताण्डवेप्रियदर्शनं।
दिगन्तदर्शने मुख्यःचतुर हस्तयोगतः।।२७२

युद्धेयुद्धरते क्षुब्धे विक्षेपे शरकर्षणे।
प्रेमाकर्षे संमुखेच पार्श्वेच तलमाश्रिते।।२७३

शरक्षेपाकरश्रेष्ठः वीरभावप्रदर्शने।
अर्द्धचन्द्रकरश्रेष्ठः उग्रनृत्ये विशेषतः।।२७४

स्थापनेस्तम्भनेऽगम्ये हृदिदेशे सदाचरेत् ।
अर्द्धचन्द्र उग्रनृत्ये आधारभावमुख्यतः।।२७५

निकुञ्चकामहाहस्त उग्रेलास्ये विचक्षणा।
उत्तरीयादियुक्तेन कटिदेशा विशोभिता।।२७६

स्थिराभावेऽनुबन्धेच आश्रिते आश्रितामहत् ।
अर्द्धस्वस्तिकभावेन कटिन्यासः क्रमोदितः।।२७७

उभयंकटियुक्तेन क्रमतालप्रदर्शने।
नृत्यकाव्यान्तयोगेन करकट्योपरितथा।।२७८

चतुर्मुख उग्रहस्त उग्रभावादिलक्षणे।
दारणे मारणेचैव अरिगात्र विदारणे।।२७९

झंपने लंफने घोरे वनेश्वापददर्शने।
चतुरव्याघ्रपादाख्य मुद्राभरतमार्गतः।।२८०

मृगाक्षा वक्षदेशेच पाशपाशविमोचने।
बन्धने इति संख्यात पाशानुबन्धचिन्तने।।२८१

शुकचञ्च्वाकरयुक्ते अभुध्यानानुभावनः।
काव्यप्रकाशमध्येन वाक्यभावप्रचारिका।।२८२

शिवकरायोगमुद्रा तल्लीन भावतत्परा।
ध्यानध्यानरता उग्रे लास्ये च परिशोभिता।।२८३

आरत्रिका देवभोग्या क्षिप्ताक्षिप्त प्रदर्शने।
विक्षिप्तभावयुक्तेन उग्रउग्रातिभावतः।।२८४

करीवक्त्राकृतिन्याये ताण्डवेसिद्ध सर्बथा।
आच्छादने कृष्यकर्मे गजशुण्डाकृति करः।।२८५

श्रुतिकुल्यात्तोलितादि तद्वत् तालप्रदर्शने।
व्याप्तिभावनायोगेन उग्रनृत्याङ्गमण्डने।।२८६

आसनादिपञ्चषड् वा देवनृत्ये विशेषतः।
केवलंनिरवेशान्त करन्यास निवेदनं।।२८७

मुग्धाति भावयोगेन विरहा विरहानले।
रतिसुक्ते आलसे च वलयांघ्रिमनोरमा।।२८८

विभङ्गा भङ्गभावेन छेदविच्छेद चिन्तने।
पोटला वासभावेन स्थिरभाव प्रदर्शने।।२८९

विराज राजिता मुग्धा प्रेमभावे समर्पिता।
क्रीड़ाप्रेमानुसिक्तश्च विराज न्यास न्यासिते।।२९०

गोपना गोपने चैव मर्द्दलावाद्य वादने।
वादित्राभावयुक्तेन उत्सवे उत्सुकागतिः।।२९१

नन्दावर्त्ता करश्रेष्ठा ताल नृत्यागमे तथा।
तालानुसारिते मुग्धा इतिभाव प्रदर्शने।।२९२

प्लावनेतरले चैव प्रेमानुप्रीतिभावने।
तरङ्गाक्षालनेरम्या सदाआनन्द दायिका।।२९३

आकुञ्चिते सञ्चिते वा छत्रके छत्रभूषणे।
समर्पिताङ्ग व्यक्तेनऽसंयुता करदर्शनं।।२९४

पुटितापुट योगेन उभयं पल्लिमिश्रणे।
शृणुहस्तगुणादर्श नृत्यज्ञानानुपेक्षितः।।२९५

द्विविधापुटिताबन्धे करपाद मनन्वयः।
केवलंकरयुक्तेन पुटिता नृत्यसौष्ठवः।।२९६

बद्धानिबद्धभावेन प्रतिज्ञाचिन्तनोदये।
दृढ़ाभाव इति मुख्ये संपुट करलक्षणः।।२९७

निष्ठास्वनिष्ठ वक्तव्य काव्यशब्दानुसारिणे।
निरवे सरवे चैव लास्योग्रे च तथैवच।।२९८

युद्धे संघर्ष चिन्तायां बद्धे निबद्ध भावितं।
स्थिरचिन्ता प्रदर्श्येच मेषयुद्ध मनोरमं।।२९९

कर्त्तरीस्वस्तिकाभग्री पृथक् दण्डंहिकेवलं।
उग्रेलास्योभयोहस्त दृढ़भावाति ज्ञापकं।।३००

छन्दहस्तद्वये शीर्षे छत्राकारेण पल्लवाः।
सौम्यपादगतिर्यूक्ते नृत्याङ्गं भूषणं सदा।।३०१

उन्मुक्ता भाव युक्तेन मृदुचरण चालनं।
तालयुक्ते करन्यस्ता भूमिदेशे मनोहरे।।३०२

पार्श्वसंमुखयुक्तेन छन्द पल्लव चूम्बिता।
एवंगम्बूज ऋद्धा सा नृत्यकर्म विचक्षणा।।३०३

ककटासूक्ष्मभावेन कुम्भका दृढ़मङ्गुलि।
भेदयुक्ते इतिहस्त आलस्य भावलक्षणं।।३०४

पृष्ठेवा पल्लवे वापि पार्श्वे वा संमुखेनच।
प्रदर्शन इतिमुद्रा न्यस्त ताल प्रदर्शने।।३०५

भेकासना महामुद्रा नृत्यप्रान्तेतिशोभना।
नृत्यान्ते नृपपाशेन उपवेशन प्रक्रिया।।३०६

प्रणत भङ्गी एतेषां युग्मे यौवत एवच।
उग्रनृत्ये सदाध्यात्वा आचरेत् न्यासविस्तरं।।३०७

महाशङ्खा सदाख्यातःवीरनृत्ये विचक्षण।
वाराह स्वरूप हस्तं उग्रेभूतत्व चिन्तने।।३०८

प्रख्यातौ संमुखे ख्यातः उग्रेलास्ये द्वयंतथा।
चतुरङ्गलियुक्तेन निष्ठा तत्वादि मुख्यतः।।३०९

खटा इति महामुद्रा पूर्वशास्त्र निरूपणे।
पार्थक्य केवलंन्यासे अङ्गुष्ठान्यासलक्षणं।।३१०

क्षातप्रक्षात व्याप्ति वा प्रशान्तभावचिन्तने।
मग्नानिमग्नभावेन लास्यादिनर्त्तनोत्तमा।।३११

प्रक्षाताविपरीतेन चुम्बितेन परस्परे।
पातनेचिन्तिते उग्रे हृदिक्षेत्रे सदाचरेत् ।।३१२

प्रणताअंजलिमुद्रा नृत्यराज्ञेसमर्पणं।
प्रान्तान्तनृत्ययोगेन आचरेत् नटीमुत्तमा।।३१३

एतानि करन्यासानि नानाभाव समाश्रिते।
नृत्येलास्ये तथाउग्रे हस्तकाभावमाश्रिता।।३१४

वन्धनृत्यः
बन्धनृत्ये न च भावं न सम्यक् रसचिन्तनं।
केवलंक्षेप विक्षेप अङ्ग बाहुल्य लक्षणं।।३१५

शरीरचालनंमात्र आसनादिविलक्षणं।
बन्धयोगेन नादानांस्थिरं भवति निश्चितं।।३१६

नादब्रह्म सदामुख्यो गान्धर्वज्ञान तत्वतः।
विना नादानुसन्धाने गीतगानादिं निष्फलं।।३१७

बन्धनृत्ये नहि गानं न सौम्य भावदर्शनं।
नहिवाक्यविनोदादि अङ्गचालन केवलं।।३१८

गगनातोरणादिषु सर्वंआनन्द दायकं।
राजप्रियंसदाबन्धः करविक्षेप साधनं।।३१९

मुखे बहुमति गानं हस्तेच अर्थदर्शनं।
नयनेभावमुख्याश्च पादताल प्रदर्शने।।३२०

हस्तयुक्तेसदादृष्टिःदृष्टिर्मानस गोचरा।
भावरसप्रदानृत्ये मानसी मानसात्मिका।।३२१

भावप्रकाशयुक्तेन दृष्टिमुष्टि विचक्षणः।
केवलंहस्तयोगेन सौम्यभाव प्रदर्शनं।३२२

रसभावात्मिका नृत्य नटी मोक्षप्रदायिका।

भावप्रकाशभङ्गी
प्रकाशयति भावानां करयोगे न संशयं।।३२३

तर्जन्याधरयुक्तेन मानसन्ताप ज्ञापिका।
कनिष्ठादर्शने क्षुब्धविरहंप्रीतिनिष्फले।।३२४

कपालंकरयोगेन विषाद खेदचिन्तनं।
कातरोहृदये न्यस्तंकरपल्लिविशेषतः।।३२५

बाहुद्वयेद्वयोः पल्लिविपरीते परस्परं।
वीरभावानुबन्धेन वाहुस्फोटः स विद्यते।।३२६

करस्पर्शेन कुचाभ्यां कामिकामरतात्मिका।
कर्ण्णपुटे करन्यस्ते सम्भ्रमे श्राव्यचिन्तने।।३२७

कटि उभय पार्श्वेन उन्मत्ता नृत्यगौरवा।
एकपार्श्वावलम्बे च अलसा भाव मोहिनी।।३२८

एवंनानास्थलेन्यस्ते हस्तं बहुरसान्वये।
नृत्याङ्गपरिशोभन्ते रङ्गे रङ्गालये तथा।।३२९

न भावविहीनानृत्य न भाव रस वर्जिता।
न रस भाव युक्तेन सर्वाभिनय निष्फलं।।३३०

यथाभावारसाश्चैव भावयन्ति परस्परं।
तथाभावान्वित भङ्गी नृत्याभिनय विस्तरं।।३३१

रसाभिनययुक्तेन नृत्यमुत्तम जायते।
आधिदैवतः
रसार्थेचिन्तयेत् नम्रे नृत्यादौ अधिदैवतं।।३३२

शृंगाराभिनये विष्णुं हास्येऽनंगं च चिन्तयेत् ।
करुणेशङ्करं सोम्यं रौद्रेच कालीदण्डधृक्।।३३३

वीरेरुद्रमहाकाल भीते भीमशङ्करी तथा।
विभत्से लोर्कपालस्तु अद्भूते चतुराननं।।३३४

एवंसंचिन्तयेत् देवं नृत्यार्थी मोददायकाः।
नृत्यं भवति निर्विघ्नो रसभावाःव्यवस्थिता।।३३५

एवंसंक्षिप्तरूपेण भावज्ञानानुसारिणः।
देशभेदे यथादेशे उड्रीत्यातिशोभनं।।३३६

अशुद्ध शुद्ध वा त्यक्तं अथ वा आत्मकल्पिते।
ममदोषो न धर्त्तव्यं भावाभिनय वर्ण्णने।।३३७

नारायणोमहीपालो खेमण्डि खण्ड मण्डन।
रसज्ञ रसिकश्रेष्ठः राजा गान विशारदः।।३३८

सर्व्वविद्याढ्य श्रीमन्तो कविकल्पलताश्रयी।
हृदयानन्दमर्थेन ग्रन्थाभिनयचन्द्रिका।।३३९

रीतिन्यासोत्तमे नृत्यखण्डं श्रीखण्डपुटितं।
भावरस समायुक्ते भावखण्डोदरं महत्।।३४०

महेश्वर द्विजश्रेष्ठः चन्द्रकल्पेश्वरार्च्चक।
ग्रन्थोऽयंरचितं नृत्यं भावज्ञान विमण्डितं।।३४१

इति श्रीमहेश्वर महापात्रेण विरचित अभिनयचन्द्रिकायां
भावखण्ड नामा द्वितीय स्तवकः।

छन्दखण्डम्

छन्दशास्त्रं महत्पुण्यं नादज्ञान स्वरूपिणी।
दशांगभेदयुक्तेन छन्दःसंगीतमुच्यते।।१

श्रुतिस्वर मूर्च्छनाच वृत्तिस्थान गुणस्तथा।
वर्णालंकार धातुना जातिः दशांग मुख्यतः।।२

भरतादि कृतग्रन्थे दशांगनिर्णयं महत् ।
स्वरछन्दे सदाध्येयं हीनागीतः सकथ्यते।।३

षडजः ऋषभश्चैव गांधारो मध्यमस्तथा।
पंचमं धैवतं सप्तनिशादादि स्वरादयः।।४

प्रतिस्वरांतराले च श्रुतिबहु विधाचरेत्।
श्रुति समूह ग्रामंच ग्रामावरोह केवलम् ।।५

अवरोहाकृते मुख्याःजायते विकृताः स्वयम् ।
गांधाराक्रोहे यांति अंतर्गांधार उच्यते।।६

विकृतस्वरयुक्तेन[१] गानकालो स्थिरो भवेत् ।
ग्रामहीन स्वरमेतदारोहे मुख्यकेवलम् ।।७

गानकाले स्वराङ्गे च समंग्रामान्वयी यथा।
सम्वादी समभावेन विवादी विषमे तथा।।८

विश्राम स्वर भेदेन मात्रानुरूप मूर्च्छना।
मात्रांतरालयुक्तेन अष्टकं श्रूयते सदा।।९

---

१. M.S.S. 2 विभङ्ग

उदात्तनिःसृता वाणी गावर्णेस्वरविक्रिया।
ऋषभो धैवतो युग्मं अनुदात्त इतीर्यते।।१०

उभय स्वर मध्येन ऋषभ "ऋ" क्षरान्वयी।
धा धैवत मात्रा सा अनुदात्त क्रमान्वये।।११

स्फारितांगेत्रिधा मुख्यं षडजःमध्यमस्तथा।
षडजे मा तथाकारे पा बीजं पंचमे तथा।।१२

मूर्च्छनादि समाक्रान्ते दीर्घ ह्रस्वादि जायते।
गानकाले कदाह्रस्वं दीर्घं वा मन्द्र मुख्यतः।।१३

स्वरं देवगतं सर्वे सदा आनंद वर्द्धकम् ।
स्वयंभूःस्वरधाता च षडजे ब्रह्म दैवतम् ।।१४

ऋषभं अर्यमाचैव धैवतं सिद्धमेव च।
मध्यमं मरुताश्चापि स्वरोष्ठ इति कथ्यते।।१५

गांधार कुशली श्रेष्ठं गांधारेऽधिष्ठितं सदा।
पञ्चमे वरुणश्चैव निषादे मातृकादयः[१]।।१६

स्वरानुसृत वाणीभ्यां छंदः शब्दसमन्वये।
दीर्घस्वर सदावक्षे कण्ठे मंद्रनिवेशितम् ।।१७

मस्तके लघुनादं च त्रिविधं स्वरमंदिरम्।
ध्वनियुक्ते तथा न्यासो वाणीन्यासः चतुष्टयम् ।।१८

समनादात्मिका स्थायी संचारी क्षणिका दृढ़ा।
उर्द्धवनादः सदारम्यः आरोही उच्चगामिनी।।१९

---

१. M.S.S. 2 सप्तमातृका

निम्नगाक्रमनिम्नेन अवरोहण कथ्यते।
एवं संगीतयुक्तेन वाणीमुख्या चतुर्विधा।।२०

गीतभाव प्रकाशार्थे करन्यास समन्विते।
स्थायी वाणीसदाश्रेष्ठः संचारी वटु नर्त्तने।।२१

आरोहे करणं श्रेष्ठं नीरवे भंगीदर्शनम् ।
अवरोहण संयुक्ते अंगमात्र विशेषतः।।२२

वटुनृत्ये सदाश्रेष्ठः संचारी वाणी मुख्यतः।
गीततालसमाहारे क्रमव्यग्रक्रमेक्रमे।।२३

क्रमोर्द्ध्व गतिशीला सा वाणीताल समन्विते।
कुमार स्वरश्रेष्ठं च विस्तारे करणं महत् ।।२४

नृत्यारंभे स्वराभ्यासे वहिर्गीतं समाचरेत् ।
आलाप इति नृत्यांग उकुटादि समन्विते।।२५

ततः समांग भावे च करयुक्ते विशेषतः।
स ख्यातोऽभिनयोमात्रा तालपादादि मुख्यतः।।२६

मात्रागीते सदारम्या द्रुतमध्यविलम्बिते।
द्रुते मात्राधिकं प्रोक्ता ह्रस्वे निम्नां सुनिश्चितम् ।।२७

विलम्बिते समश्चैत्र लम्बने लम्बितावृते।
दशप्राणमयः तालः दर्शयेत् मार्गविस्तरात् ।।२८

यत्राभिनय मध्ये च मात्रालुप्ता भविष्यति।
शुद्धनृत्ये समाध्यायेत् केवलं हस्तकोत्तमम् ।।२९

नीरवे हस्तकं श्रेष्ठं सरवे करज्ञापनम् ।
स्वरगीति समायुक्ते छंदो नृत्यविधियते।।३०

नृत्यांगे स्वरसर्वाणि वाक्यभेदे पदद्वयम् ।
करभावान्वये मुख्ये दृष्टि निर्द्धारणं तथा।।३१

श्रुतिभेदेन नृत्यंच पृथक् रीति विधियते।।
श्रुतिभेदाः
उड्रे भावप्रकाशार्थं श्रुति मरव्यां हि केवलम् ।।३२

श्रुतिश्चतुर्बिधा ख्यातागुरु मृदुसमस्तथा।
अर्द्धश्रुति इति ख्याता श्रुतिज्ञान चतुष्टयम् ।।३३

संगीतार्थं श्रुति मुख्या शृणुनृत्य प्रयोजनम् ।
अरोहे गुरु मुख्यंच च न तत्र पादचालनम् ।।३४

अवरोह समायुक्तं यत्र विषय वर्णना।
कर्त्तव्यं तत्र नृत्यं च मृदु भागेन संशयम् ।।३५

समभावे यथागीते ध्रुवमावृत्तिमुत्तमम् ।
यत्रसमं[१] समग्रामे[२] यमकः स विधियते।।३६

यमको गीतयुक्तेन मूलताल[३] समन्वये।
वद्नृत्यं तथाकाले कर्त्तव्यं नृत्य वेदिनः।।३७

गीतकाले स्वरांतेच यथामात्रादि खण्डितम् ।
स अर्द्धस्वर स्थानं च गीतज्ञानेन उत्तमम् ।।३८

---

१. M.S.S. 2 त्रय
२. M.S.S. 2 वृत
३. M.S.S. 2 वृत

नृत्यार्थी अर्थभेदेन केवलं अंग दर्शयेत् ।
भंगीभिन्नं तथागीतं न कुर्यान्नटीमुत्तमम् ।।३९.

कुतपगण संयुक्ते उत्तर गायिका तथा।
खंडगान समायुक्ते कुर्वन्ति गान खंडितम् ।।४०

मूर्च्छना वाद्ययुक्ते च श्रुतियुक्ते मनोहरे।
कुर्वन्ति अवरोहादि नृत्य संगी विचक्षणः।।४१

मूर्च्छना सा पृथक् रूपा स्वरविकृत गायने।
गायनादि समायुक्ते नाट्यांगे सा प्रयोजना।।४२

मृदंगनादभेदेन मंद्र मध्य धीरादयः।
पेलवी
पल्लवी गीत प्रांतेच वटुनृत्यार्थी कारयेत् ।।४३

द्विविधं पेलवी मुखेव भावस्वरानुसारतः।
भावयुक्ते पदभ्यां च कराभ्यां हस्तकान्वये।।४४

भंगीयुक्ते यदानृत्यं भाव पेलवी कथ्यते।
स्वरयुक्ते स्वराकारे द्रुतेच पादचालनम् ।।४५

स्वर पेलवि स ख्यातः तालानु पेक्षितः सदा।
स्वरानुछंद मात्रादि गीताभिनयमाचरेत् ।।४६

छंदनृत्ये सदाध्यायेत गीत भावतः।
गीतलक्षण
गीतं तत्त्रिविधं मुख्यं देशीग्राम्यं च संस्कृतम् ।।४७
देववाणी सदा ध्यायेत् देवनृत्ये विशेषतः।
छंदग्राम समायुक्ते लौकिक वाणीमुत्तमम् ।।४८

सदेशी कथितो शास्त्रे उपगीति इतीर्यते।
विनाछंदार्थ बोधंच रस ग्राम विवर्जितम् ।।४९

स भाषाग्राम गीतश्च हीनः गीतमहोत्सवे।
पात्रा पात्रार्थये भाषानिर्वाचयेत् सदासुधीः।।५०

भाषानुरूपकं पात्रं सात्विका द्विगुणक्रमात् ।

गुणभेदे नृत्यभेदाः
सरव रज स्तम इति भेदाः सर्वत्र विद्यते।।५१

छंदनृत्ये तथान्याये त्रिधा जायेत सर्वदा।
शुद्ध शास्त्रीय सछंदो भरतादि समर्थितः।।५२

दैवानुग्रहप्रीत्यर्थं नृत्यं तत्सात्विकी स्मृतम् ।
रंगालये नृपस्याग्रे तालमान रसाश्रये।।५३

लास्यछंदगतं नृत्यं राजसी साभिधियते।
स्त्री वेशधारी पुरुषो नृत्यछंदादि शोभितः।।५४

तामसीकथितं देशे लोकाचार अनुस्तुते।
देवालये रंग क्षेत्र अथवा नृपसन्निधौ।।५५

तामसी नृत्यं न कुर्यात् छंदज्ञ न विवर्जितम् ।
केवलं व्यसनार्थंच ग्राम्ययात्रा महोत्सवे।।५६

यवननृपतोषार्थं प्रेरयेत् पुंस नर्त्तकी।
धर्महीन नृपस्तुच्छः स्पर्शने नटीनिन्दितः।।५७

देवकार्यार्थं, न योग्यः अथवा नृपसेवने।
यद्यपि नर्त्तने पुंसः समर्थो जायते क्वचित् ।।५८

विना स्त्री अङ्गयुक्तेन भावः कुत्र विचक्षणः।
विना भावे सदा हीनं गीतं वा अङ्गमाधुरी।।५९

छंदज्ञानार्थं सा श्रेष्ठा नृत्यं सरव कथ्यते।
छंद गीतावृत्ते नम्रे आचारादि समाचरेत् ।।६०

नृत्यारंभे शिष्टाचार विधिः

श्रृणुत्वं विधि नृत्यांगं शिष्टाचारस्य लक्षणम् ।
दण्डपाद समायुक्ते ललितं मुखमाश्रितम् ।।६१

कटिपार्श्वे तथा न्यासेत् कटिबद्ध करद्वयम् ।
किंचित् तिर्यक् गतियुक्ते कुर्य्यात् धीरांघ्रिचालनम् ।।६२

धत्तादि शब्दयुक्तेन नटीमाचरेत् सदा।
ऊर्द्धवाग स्थिररूपेण कट्योर्ध्व मंडले सदा।।६३

केवलं जानुपादाभ्यां संचालयेत् मुहुर्मुहुः।
एवं प्रारभीते नृत्यं नृत्यार्थी गुरुचिन्तयेत् ।।६४

ततः श्रीविग्रहं ध्यात्वा यथा देवस्य तद्रूपम् ।
कुतपादि समावेशे कर्त्तव्यं इष्टवन्दना।।६५

तदानुसारिणी नेत्राः स्थायी दृष्टि विधानतः।
दैवं वा प्राकृतं वाणी नटीमुच्चारयेत्तथा।।६६

अञ्जलि कर संयुक्ते दर्शयेत् करपल्लवाः।
लतांकुरे यथाकारे पल्लवं परिदृश्यते।।६७

तथा पल्लवी नृत्यांगे आचरेत् नाट्य वेदिनः।
प्रतिगीतांतरे रम्ये प्रतिपादान्वयेतथा।।६८

वटुनृत्य लक्षण

पल्लवि नृत्य स ख्यातो वटु नाम्रा विशेषतः।
ध्रुवादि छंद संयुक्ते यत्रावृत्त्या स्मरेत् पुनः।।६९

तत्र नृत्यं सदाख्यातं उकुटादि क्रमान्वये।
पेलवान्ते तु कर्त्तव्यं गीतगानं यथाविधि।।७०

भावानुसारतः नादमुच्चरेत् रसयोगतः।

रसानुस्त्रुते स्वराचरणम्

वीर रौद्रं च अद्भुतं भावगीते विधानतः।।७१

षडजं ऋषभं श्रेष्ठं गीयते नाट्यमुत्तमम् ।
विभत्से भीति संयुक्ते धैवतं सुसमाचरेत् ।।७२

कारुण्यं हास्य योगेन गांधारश्च निषादकम् ।
आदिरस प्रकाशार्थे मध्यमं पंचमं द्वयम् ।।७३

शांत वात्सल्य तत्तुल्यं मध्यमेन सुखावहः।
विनाभावमयं गीतं रसतालादि वर्जितम् ।।७४

निन्दित वाणी स हीना ग्राम्य गीतः स कथ्यते।
विनालंकार शब्दादि उपमादि विवर्जितम् ।।७५

ग्राम्य गीत इति हीनं ध्येयं नृत्य समुत्सवे।
वनेग्रामे पुरे चैव नगरे वा जनागमे।।७६
जनानन्दार्थं यन्नृत्यं ग्राम्यनृत्य इतीर्यते।

ग्राम्यनृत्यभेदानि

रासोल्लासं भ्रामरीच प्रेरणी भिल्लमेवच।।७७

चड्डुक मेढ गंधर्वं पाटवं बहुरूपकम् ।
चित्रं हलपि आलक्तं चंचूपुटं च ऋक्षकम् ।।७८

नवपंचक शून्यं च घटनृत्यं मनोहरम् ।
वीरनृत्यं तुङ्ग नत्यं रुद्रदंड विचक्षणम् ।।७९

उदण्डमश्व भृत्यं च नानामूर्ति समाश्रितम् ।
बंधनृत्यं उत्कटं च नृत्तं रुच्यानुसारतः।।८०

उत्सवे व्यसने ख्यातं नृत्यछंदादि वर्जितम् ।
विनाभावस्तथा तालः लयादि ग्रामवर्जितम् ।।८१

ग्राम्यगीत समायुक्ते केवलमंगचालनम् ।
मुख भंग्यादि संयुक्ते मिश्र रस प्रदर्शनम् ।।८२

ग्राम्यनृत्यं न कर्तव्यं देवाग्रे नृप सन्निधौ।
उत्सवे व्यसने चैव पटुआरे विशेषतः।।८३

नानानृत्यं तु कर्त्तव्यं श्रृणुतल्लक्षणं क्वचित् ।

रास

रास मंडल युक्ते च राधिका ब्रज नंदनः।।८४

सखीवेशधराः सर्वे नट श्रेणी विशेषतः।
श्रीकृष्णचरितं पुण्ये गायंति स्वरमाश्रिते।।८५

तालादि रहितं छंदं मृदंगनाद केवलम् ।

उल्लास

नटीद्वय समाकारं समवेश विभूषिते।।८६

करछंदान्वये नृत्त्यं कुर्बन्ति गीतमाश्रिते।
विवाहे जन मध्ये च व्यसने च वरागमे।।८७

उल्लास नृत्तं तत् ख्यातं वेशोत्कृष्टं हि केवलम् ।

भ्रामरि

हस्त सुम्र मालाच गले पुष्पविभूषणम् ।।८८

कुंच कांचला संयुक्ते भ्रमंति नट वेगतः।
भ्रामरी स इति ख्यातं विचित्र भूषणाम्बरम् ।।८९

प्रेरणि

ढकवाद्यगते नृत्तं जनमानंद वर्द्धयेत् ।
नटी वा नटयुग्मे च गीतमान महोत्सवे।।९०

प्रश्नोत्तरछले गीतं गायंति युगले तथा।
विनाभिनय संयोगे केवलांग प्रदर्शनम् ।।९१

गीत प्रत्युत्तर श्रेष्ठं प्रेरणी मधुरं सदा।

भिल्ल

द्विपी चर्माम्बरं रम्यं शिखी पुच्छाग्र शोभितम् ।।९२

गुल्मजहार संयुक्तैः नृत्यंती नट नर्त्तकी।
प्राकृतगीत गायंति थेइया धेइयादि मिश्रितैः।।९३

भिल्ल नृत्यमिति ख्यातं ग्रामांते आचरेत् सदा।

चड्डुक
व्याधरूपधरः पुंसकः रम्य नटी समायुक्तैः।।९४

पौराणिकाख्यायिकादि गायंति मधुरैः स्वरैः।
ढमालिका ढगश्चैव खंडशब्दादि पुरितैः।।९५

उत्ताल नृत्तगानं च कुर्वन्ति चड्डुकाद्वयम् ।
मेढ़
रंगतादि समाबेशे प्रभामंडल वेष्टितम् ।।९६

वृत्रिमकर दंडादि मुखोदर परिवृते।
नानाभरण भूषश्च सुचित्र वनसावृत्ते।।९७

नानारूप समायुक्तैः नृत्यंति नटमुत्तमम् ।
कात्यायनी महाकाली धूर्जटी मंगलाकृतिः।।९८

नृसिंह रूपयुक्तेन मेढनृत्तं मनोहरम् ।
काहालादि समावेशे मृदुतालानुसारतः।।९९

नृत्यंति नट श्रेष्ठं च मेढं कष्ट प्रदायकम् ।
गन्धर्व
यूथिका मालतीमाला अलंकारादि मंडितम् ।।१००

फलपुष्पालकायुक्तैः नानागंध विलेपितम् ।
मर्दल तालयुक्ते च कटिभंगी प्रदर्शिते।।१०१

नृत्यंति नट सहस्यः रसिकवर बेष्टितम् ।

पाटुआ

देवपादोदकं धृत्वा दंडं घट समन्विते।।१०२

शिरदेशे तथादंडं पाटुआभ्यां पदद्वये।
कुंचफेरतथा योवा घर्घरी श्रेणीमंडितम् ।।१०३

ख्यातं दैवालकं नृत्तं नानाभंगी समाश्रितम् ।

बहुरूप

म्लेच्छज व्याध पुरुषः सदाहीन नटोऽधमः।।१०४

नानारव समायुक्ते नृत्यंति लोक मंडले।
भिक्षार्थं नृत्य कुर्वन्ति कुत्सितरूपमाश्रिते।।१०५

बहुरूप इति ख्यातं बालकानां सुखावहम् ।

चित्र

अंगेरंगं समालेप्य वैचित्र वसनावृतम् ।।१०६

नट नृत्यं प्रदर्श्यन्तिचित्रनृत्तं तदुत्तमम् ।

हलपायन

शंकुपट्ट समावृत्तैः ग्रामांतेरूप कुत्सितैः।।१०७

नटः भयेतथा रम्ये नृत्यंति ढोल वादने।
एकोनटोयदि तत्र आलक्त सहि कथ्यते।।१०८

शिरदेशे पल्लवादि अधिके हलपायनम् ।
वैचित्र वसनैर्युक्तैः नानाभरण भूषितैः।।१०९

कटि भागोपरि घण्टि माला घर्घरीकावली।
स्कन्ददेशे पक्षगुच्छ रुक्षरूपी नटोधमः।।११०

चंचुपुट

बृहत् चंचु मुखाग्रेच चंचु पुटः सविदिताम् ।
विकृताकृति पादं च करग्रीवा मुखोदरम् ।।१११

ऋक्षक

ऋक्षाकार मुखयुक्तैः नृत्यंति क्रूर ऋक्षकम् ।
किशोर पंच वामे च दक्षिणे नव संख्यकान् ।।११२

नवपंचक

नृत्यंतिछंद योगेन करपादान्वये तथा।

शुन्य

अर्द्धचन्द्रं स्वस्तिकं च महापद्माकृते क्वचित् ।।११३

रासमण्डल न्यायेन रचन्ति बंधमुत्तमम् ।
अत्युच्च बंशदंडाग्रे चक्रमध्ये विचक्षणे।।११४

दर्शयन्ति क्रीडाभंगी देशगीतावलम्बने।
नागबंध चक्रबंध पुष्पबंधाति शोभने।।११५

शून्यबंधादि कुर्वन्ति बलिष्ठा नायिका वली।
शून्यनृत्य इतिश्रेष्ठः व्याधनारी प्रदर्शित।।११६

दंडनिम्ने कुटाहश्च कडादंडादि मुख्यतः।
कटियुग्मे मस्तके, च कलशं पर्ण शोभितम् ।।११७

वहन्ति नटिनस्तत्र भ्रमंति गीतमाश्रिते।

घटि

घटि मुखोपरी कुत्र नाना भंगी प्रदर्शने।।११८

ग्राम्यगीते तथा रम्ये रमंति ग्रामवासिनः।
वामे चर्म तथा सव्ये खड्गमेकं सुनिर्मलम्।।११९

वीर

कटिदेशे काछटा च घण्टिमालाविभूषितम्।
बाहुदंड खड्गदंड दंडविपरीताकृतिम्।।१२०

क्रीडन्ति वीरयुगलं बंध वाद्य महोत्सवे।
तुङ्ग नृत्त इति श्रेष्ठः पंचाधिके यदि क्वचित्।।१२१

वीराङ्गनृत्य एतेषां रुद्रदण्ड विचक्षणः।

तुङ्गनृत्य

शिरेपद्माकृतिश्शूल नानास्त्र भूषितं वरम्।।१२२

कांडताटि समायुक्ते नृत्यंति वीररूपतः।
उदंडश्च महाकाय अग्रेपृष्ठे जनद्वयम्।।१२३

नृत्यंति अश्वरूपेण वृषभादि रूपाकृते।

विभङ्गबन्ध

विभंग बंध पुटिता पाटलादि यथाक्रमे।।१२४
आचरेत् बंध दृश्याभा वटु आदौविशेषतः।
उत्ताले करपादाभ्यां अति वक्राकृते तथा।।१२५

नृत्यमध्ये प्रकुर्वन्ति विचित्र नटीमुत्तमम् ।
नृत्याभिनय मध्ये च केवलं बंधमाचरेत् ।।१२६

अन्यनृत्यं सदाहीनं वर्जयेत् नृत्यवेदिनः।
प्रति गीतांतरेयत्र वटुनृत्य प्रयोजनम् ।।१२७

आचरेत् बंध अंते च नृत्यादौ न कदाचन।
बंधनांते नटी क्षेत्र गुरुं ध्यात्वा विचक्षणे।।१२८

स्थायी भंगी समायुक्ते चालयेत् पदपल्लवाः।
मृदंग नादसंयोगे पातयेत् पादमुख्यतः।।१२९

यथा वाद्य तथा पाद पाद वाद्य यथाक्रमे।
स्मरेत् वाद्यं सदा ध्येयं नादशब्द विधानतः।।१३०

वादित्र करघातेन ताल ष्पटोभिजायते।
तत्ताल समरूपेण पातयेत् पादनर्त्तने।।१३१

मुखे वाणी वपुर्देशे भंगी कर्त्तव्यनिश्चितम् ।
शृणु मृदंग तत्वं च नादस्थानादिकं क्रमात् ।।१३२

भेदं च करघातं च प्रयोगादि सुनिर्मलम् ।
मृदंग नृत्ययोगेन त्रिविधमुत्तमं सदा।।१३३

समश्च मुरजश्चैव गोमुखाकृति गोमुखम् ।

मृदङ्गलक्षण

वामेदिगाङ्गुलि श्रेष्ठं दक्षिणे अष्ट मुख्यतः।।१३४

कुत्राधिकं प्रकुर्वन्ति देशरुच्यनुसारतः।
पनसे वांधणे चैव गंभारि काष्ठनिर्मितम् ।।१३५

मध्ये गर्भ प्रकुर्वींत द्वादशांगुलि यत्नतः।
वामेकिंचित् प्रशस्तं च दक्षिणे न्यून क्षीणतः।।१३६

मृदंग इति स श्रेष्ठः नृत्यकर्मे प्रयोजनम् ।
मृण्मय निर्मितं गात्रं नकुर्य्यात् हीनसर्वदा।।१३७

गोमुखः मुरजः सर्वे रंगनृत्ये प्रयोजनम् ।
पार्श्वाभ्यां मंडलाकार दृढ़चर्मीविनिर्मितम् ।।१३८

कालि कथित भाषायाद्विपार्श्वे समरूपतः।
तन्मध्ये किरणं तत्र द्विपार्श्वे मंडलाकृते।।१३९

दक्षिणे न्यूनरूपेण वामे यव त्रयोधिके।
तद्युक्ते शब्दमाकृष्य ग्रहमात्रानुसारतः।।१४०

वामांशे घन नादानि प्राप्नुयात् विधिपूर्वकम् ।
वलाढ्य समायुक्ते रुजुभ्यां चर्मनिर्मितम् ।।१४१

स्वराबद्धार्थं तद्देयं बलाढ्य समायुतः।
तन्मध्ये स्वरतंत्रार्थं गुल्म चाष्टसंयोजयेत् ।।१४२

नादकर्मे सदाध्येयं गुल्मावली विशेषतः।
ताल मात्रादयः सर्वे वामेढेकादयः पुनः।।१४३

सप्तमध्ये दक्षिणांशे आचरेत् चतुरं तथा।
वामांशेकृष्णकिरणे केवलं अंगुलि यदि।।१४३

स्पर्शयेत् द्रुतभावेन कत्तंधन्[१] शब्दजायते।
धा धित्यादि द्रुताः सर्वे वामदेशे मनोरमा।।१४४

तातित्यादि निशारादि मुख्यतः दक्षिणे तथा।
धिलाङ् धलाङ् धत्ताधित्ता कत्ताद्या उभयात्मकम्।।१४५

ज्ञानानुसारतः वाद्यं वादयेत् वादकोवरः।
प्रतिगीतांतरे रम्ये ध्रुवादि स्मरणाकृते।।१४६

वादयेत् द्रुतमात्राभ्यां यथारागानुसारतः।
गीतमात्रानुसारेण तालमात्रा अनुवृते।।१४७

वादित्र वाद्य संयुक्तै दर्शयेत् नादमुत्तमम् ।
नादानुगत पादाभ्यां मात्रानुसारतः न्यसेत् ।।१४८

सा हि कथित नृत्याङ्ग भरतादि समर्थितम् ।
मृदंगांगे यथानाद नटीपाद तथाकृते।।१४९

स्वरानृसृत पादपात

स्वरानुसृत तालाभ्यां आचरेत् नटीमुत्तमा।
पादस्य दक्षिणपार्श्वे मध्य देशे विशेषतः।।१५०

धा, तत्र वर्त्ततेनि, च कनिष्ठातलमाश्रिते।
वामांशे ऊर्द्धवदेशेन तनाद्यंगुष्ठचालने।।१५१

---

१. M.S.S. 2 किनत्ता धिना

गा संधितलयुक्तेन धत्तादि पूर्णपातने।
पादनाद समग्रामे स्मरेत् नादंच नर्त्तकी।।१५२

नादभ्रष्टे सदानृत्य निन्दितं नृपमंडले।
नादतालानुसारेण भावहाव प्रदर्शनम् ।।१५३

गीताभिनय बेलायां कर्त्तव्यं सावधानतः।
नादपादसमे चैव समभंगी गतेध्रुवम् ।।१५४

भंगीव्यतिक्रमो, यत्र नृत्यतत्राऽधमो भवेत् ।
भंगीयुक्तेतु कर्त्तव्यं पादन्यासादिकं तथा।।१५५

उकुटानुसृत नाद तदानुसृत पादयोः।
स्वरमानसमग्रामे यत् खंडछंदगीयते।।१५६

उकुटलक्षण

तालानुसृत वर्णाभ्यां उकुटाख्य इतीर्यते।
सानिधादिऽक्षरं नादमुच्चारयति कुतपाः।।१५७

तद्वर्णानुगते नृत्यं कुर्वन्ति नृत्यवेदिनः।
तत्ताल योग संयुक्ते नात्रानुगत अक्षराः।।१५८

सा च वदंति नृत्यज्ञ उकुट वाणी लक्षणम् ।
ज्ञानानुसारतः नादं कर्त्तव्यं विधिपूर्वकम् ।।१५९

हीनमात्रा सदा त्याज्या नृत्यगान महोत्सवे।

ठाणिलक्षणं

उकुटानुसृत ठाणी करणानुरूपं क्रमात् ।।१६०

ठाणीयुक्त तुकर्त्तव्यं नृत्याभिनय यत्नतः।
गीतभावानुसारेण षडङ्गादि प्रदर्शने।।१६१

अंगन्यास इति ठाणी नृत्यार्थि मोददायकम् ।
हास्यादि रस सर्वाणि पंचहेतु समन्वये।।१६२

निवसायंति गीतार्थं ठाणी तदनुरूपकम् ।
लक्ष्यापलक्ष उपमा निवृत्तिमंतरा तथा।।१६३

पंचहेतु

पंचहेतु सदाख्यातः भावनृत्ये विशेषतः।
छांदानुविषयं बोधे भावमुख्याति जायते।।१६४

तल्लक्ष मुख्यरूपेणऽभिनये तादृशं भवेत् ।
नृपादि मंडलार्थे च मुख्याभिनय चिन्तयेत् ।।१६५

वर्द्धयेत् दर्शकानंद उपलक्ष इतीर्यते।
काव्य वस्तु प्रकाशार्थे उपमाचित्त व्यंजकम् ।।१६६

कर्त्तव्यं तु तदाकारं हस्तकादि विलक्षणे।
काव्यावृत्ति स्थले गीते भिन्नरसमुपस्थिते।।१६७

अङ्ग चांचल्य तत्तुल्यं निवृत्ति इतिकथ्यते।
गीताभिनय मध्ये च प्रांते ध्रुवपदं स्मरेत् ।।१६८

पेवली मृदु नृत्यं वा ध्यायेत्तत्र न संशयम् ।
अंतरा इति नृत्यांग दर्शकानंदवर्द्धक।।१६९

पंचहेतु इति श्रेष्ठः छांद नृत्ये विशेषतः।
छांदस्यविषयाभ्यासे यत् भावाभिनयमुत्तमम् ।।१७०

नटीतद्भावहृदये स्थापयेत् स्थिररूपतः।
नानारस समाकृष्टे यद्यपि भिन्नलक्षणम् ।।१७१

प्रकाशयंति नृत्यार्थी न त्यजेत्लक्ष्यमुख्यतः।
यत्रसम्बोधनं शब्दं गीत बोधे भविष्यति।।१७२

तत्र मृदुपदक्षेपे क्षिपेत् दृष्टि नृपार्थये।
उपलक्ष इति नृत्ये गीताभिनय लक्षणे।।१७३

उपमाविषय भेदे दर्शयेत् विधि पूर्वकम् ।
काव्योपमा सदा ग्राह्य अंगहार क्रमान्वये।।१७४

उपमा दर्शयेत्तत्र यथावाक्यानुसारतः।
निवृत्ति उत्तरा ग्राह्या तत्रसाकृति व्यंजना।।१७५

पादभंगी सहहस्तं दर्शयेत् झटिति तथा।
भावोन्यार्थे सदाकुर्यात् अन्य न्यास यथाक्रमे।।

निवृत्ति गीतमर्थेच सदानन्द प्रदायकः।
गीतांते ध्रुवमावृत्ये तत्तालानुसृते पदः।।१७७

चालयेत् द्रुततालाभ्यां प्रत्यावर्त्त्यं पुनः क्षणात् ।
यथापूर्वे प्रारंभेच तत्तुल्यं भंगी संग्रहेत् ।।१७८

प्रारभ्यते तदाअन्य गीतपदं यथाक्रमात् ।
गीतान्ते पदप्रांते वा लघुनृत्योऽथवा गुरुः।।१७९

मात्रानुसृत नृत्यांगं दर्शयेत् अंतराश्रितम् ।
मार्ग
गीताभिनय हेत्वादि नृत्यमार्गानुसारतः।।१८०

नृत्यमार्गातिरिक्तेन अधमो कथ्यते सदा।
घूर्णन वर्गमार्गंच पालि नागपथं तथा।।१८१

1 बेलूरु मन्दिर-नायिका





नृत्येश्वर

मृदंगवादक शिव

स्खनित वसना



कज्जल लिए नायिका

चेन्नकेश्वर मन्दिर
नायिकाएँ





खजुराहो-नृत्य

नृत्यर्थे मार्ग चत्वारः आचरेत्नृत्यवेदिनः।
केन्द्रदेश समारभ्य नृत्यतालानुसारतः।।१८२

वलाकृति तदापार्श्वे वारत्रयं च घूर्णयेत् ।
सव्यपार्श्वस्थले अन्ते निवर्त्तेत् केन्द्रचिन्तने।।१८३

घूर्णनं ध्रुव नृत्येण सदा आनंद वर्द्धकः।
ध्रुवमावृत्य कालेन केन्द्रदेशं विजानत।।१८४

द्रुतांग नृत्यमारभ्य वर्गक्षेत्रावृतिं तथा।
प्रतिकोंणे तथा मध्ये ठाणी मुख्ये प्रदर्शयेत् ।।१८५

कोणवर्ग गतक्रीडा कथ्यते नृत्यवेदिनः।
यत्कोणादौ समारंभे-दन्ते तदनुसारिणः।।१८६

प्रविश्यंति सदाकेन्द्रे नृत्यार्थि चिन्तयेत् सदा।
दंड पादान्वये नृत्यं चालयेत् पादयुग्मकम् ।।१८७

अग्रे यथा तथापृष्ठे सहसममुखस्तथा।
पालिचालि इतिश्रेष्ठः छान्दान्तेच मनोहरम् ।।१८८

दंडाकृति पथोपालि आचरेत् नटीमुत्तमम् ।
भुजंग मार्ग संयुक्ते भुजंग गतिरूपतः।।१८९

प्रति पार्श्वेतुगन्तव्यं पातकेन्द्रानुसारतः।
एतानि मार्गभेदानि शृणु पाताङ्ग लक्षणम् ।।१९०

पात् (प्रयोग)

मार्गकेन्द्रे तथा अग्रे क्वचित् पातसुखावहम् ।
दंडायमान रूपेण आचरेत् पातयत्नतः।।१९१

यथा पाद तथाहस्त करताल समन्विते।
उत्तोलयेत् पदमेकं स्थापयेत् पार्श्वमुत्तमे ।।१९२

तदाकारे करेचैव दर्शयेत् समपार्श्वगे।
पुनः पादकरौ युग्म समरूपे समाकृषन् ।।१९३

अग्रे पादं तु संस्थाप्य वक्षक्षेत्रे करद्वयम् ।
एतानि पात संयुक्ते मात्रा स्पष्टः स जायते।।१९४

मात्रा विश्रान्ति रूपेण गरिष्टं पात सर्वदा।
दंडपादे सदाश्रेष्ठः लास्ये उग्रे च कुंभकम् ।।१९५

गीतारंभेन कर्त्तव्यं अन्ते वा ध्रुवमाश्रिते।
मध्यस्थानेन यत् क्षेत्रं कुतपादर्शकावृतम् ।।१९६

तत्स्थले नृत्ये कर्त्तब्यं सदापालि अनुसृते।
यद्रेखा कल्पितं क्षेत्र नटीमार्ग विवेचितम् ।।१९७

पालि

सपालि इति नृत्यांग प्रयोगे च चतुष्टयम् ।
मंडलं वर्गमार्ग च नागमार्गं च पंकजम् ।।१९८

नृत्यार्थी नृत्यकर्त्तव्यं पालिमार्गेविशेषतः।
उकुटादि समाहारे यथायत्र प्रयोजनम् ।।१९९

ध्रुवंप्राप्ते तथा आदौ प्रांते च आचरेत् सुधीः।
पालिमार्ग न कर्त्तव्यं गीताभिनये केवलम् ।।२००

शृणु न्यासविधि रम्यं पालि मार्गंतु यत्नतः।
नृत्येतालानुसारेण द्रुतयत्र प्रयोजनम् ।।२०१

घूर्णनं सतु कर्त्तव्यं धधाङ् नाद समन्विते।
नृत्यांते तालमध्ये च द्रुतनादत्रयं चरेत् ।।२०२

तरकट् तक्धा ज्ञात्वा वर्गपालि समाचरेत् ।
मंजुलं नृत्य प्रारभ्य केन्द्रं त्यक्त्वा च दक्षिणे।।२०३

नादत्रयः स विज्ञेयः कोणपत्रे विधानतः।
वर्गरेखान्वये रम्ये दर्शयेत् नटीमुत्तमम् ।।२०४

एतानि वर्गपाल्याख्यं द्रुतनृत्ये मनोरमम् ।
तालानुसारिणः नादउकुटादि सह तथा।।२०५

द्रुतनृत्ये यदिकुत्र बहुताल प्रयोजनम् ।
नागमार्ग समालम्ब्य धाधिनि् नाक् मुहुर्मुहुः।।२०६

उच्चार्य नृत्य कर्त्तव्यं ध्रुवनादे मनोहरम् ।
आरभ्य पादसंचार वामेभागे त्रयं गमेत् ।।२०७

पुनः नागगतिं ध्यात्वा दक्षिणे च त्रयं तथा।
एवं वारत्रयं गत्वा पुनः पृष्ठे त्रयं सुधी।।२०८

दर्शयेत् नागमार्गेन गीतांते च सुखावहम् ।
वंदनांते नटीज्ञात्वा मार्गं पंकज यत्नतः।।२०९

त्रिभंग ठाणी युक्तेन पाताकाकारमाचरेत् ।
गीताभिनय पूर्वे च यत्रालाप भवंति ह।।२१०

तत्रत्रिभंग युक्तेन पद्ममार्गे च घूर्णयेत् ।
अवलोक्य तथा लास्य हास्योष्ठ दर्शकावली।।२११

घूर्णयेत् पंकजाकारे प्रारभ्याभिनयं तथा।
गीताभिनय मध्येच भावांतर प्रवेशने।।२१२

त्तोलिन भंगीयुक्तेन कर्त्तव्यंविधि पूर्वकम् ।
छंदिताकर युक्तेन अलसा भंगीमाचरेत् ।।२१३

प्रसारयेत् पदमेकं तत्पार्श्वे पृष्ठ चुम्बिते।
छंदिताकर योगेन तद्भूमिं स्पर्शनान्तरम् ।।२१४

त्तोलयेकर छत्राङ्ग शिरोर्द्धवे समवेशयन् ।
क्षणे क्षणे पार्श्वदेशमारभ्य गगनं प्रति।।२१५

उत्तोलन (उठा)
दर्शयेत् त्तोलनं साहि उठालोके प्रतिष्ठितम् ।
नृत्यारंभेथवा मध्ये गीतशेषेविशेषतः।।२१६

एकपादान्वये पात त्तोलनेकिञ्चिदुत्तमम् ।
कटि पार्श्वोभये भाष मुहुर्मुहुः सदाचरेत् ।।२१७

हंस पक्षाकृति पल्लि योगेन दर्शयेत् सुधीः।
कुंभपाद समायुक्ते धाधिन्यादि यथाक्रमे।।२१८

गतियुक्त सदाभाष दर्शयेत् नटीमुत्तमम् ।
केवलं घूर्णने हीनं नाचरेत् नृत्यवेदिनः।।२१९

आसनेस्थिर भावाङ्गे पातादिनिष्प्रयोजनम् ।
सर्वगति समावेशे उकुटादि यथाविधि।।२२०

चरेत् आसनकालेन न खंड वाक्यमाचरेत।
काव्य वाक्य प्रयोगे वा नृत्यमध्येथवा यदा।।२२१

उपवेशन वइठा

उपवेशन भावाङ्ग प्रकुर्वन्ति नटिं क्वचित् ।
नेत्रादि भंगी भावार्थं आचरेत् नृत्यमासनम् ।।२२२

करमुद्रादि तद्भावे दर्शने सुमनोहरम् ।

आसन

आसनं द्विविधं श्रेष्ठं स्थिरा व्यापिनीमेवच।।२२३

स्थिरा भाव प्रकाशार्थं व्यापिनी चरमे चरेत् ।
पादांगुल्यो परिस्थिरे जानुभ्यां च तलं स्पृशेत् ।।२२४

स्थिरा

पादपृष्ठे समासीने स्थिरा वदंति पंडिताः।
व्यापिनी प्रांत नृत्ये च बंधारंभे समाचरेत् ।।२२५

प्रसारितांघ्रि स्वे पार्श्वे समाकारेण दर्शयेत् ।
ध्वजकर समायुक्ते दर्शयेत् संमुखं प्रति।।२२६

चिरा

चिरादेश इति ख्यातः वइठाङ्गःस कथ्यते।
व्यापिन्यन्ते यदाकुत्र नवगीते प्रयोजनम् ।।२२७

आचरेत् ठाणीश्रेष्ठं च यथाप्रारंभमुत्तमम् ।
अंजलीकर न ध्यायेत् नवनृत्ये क्वचित् सुधी।।२२८

करछंदान्वये पार्श्वे स्थापयेत् करपल्ल्वम् ।
त्रिभंगठाणी योगेन धनुपादे विशेषतः।।२२९

ठाणीयोगंतुकर्त्तव्यं दंडायमान यत्नतः।
कटिभागोपरि पल्लि आश्रितावत स्थापयेत् ।।२३०

मृदुताल समायुक्ते चालयेत् पदपल्लवः।
स्मितहास्यगते नेत्र अपांगादि सुचालने।।२३१

कटि संचालयेत् पार्श्वे क्षीणाकारे मुहुर्मुहुः।
त्रिभंगांते क्वचित् नृत्ये अर्द्ध स्वस्तिकमाचरेत् ।।२३२

स्वस्तिक ठाणीयुक्ते च मानमुद्रा प्रदर्शयेत् ।

ठिआ

ठिआ ठाणी इतिख्यातः सदामानंद वर्द्धकम् ।।२३३

तदन्तेतुतथा चालि योगेन नृत्यमाचरेत् ।
नृत्यारंभे गीतांते च मध्ये भावांतरेथवा।।२३४

सागति श्रेष्ठ नृत्यांगे लास्यनृत्ये विशेषतः।।

गतिचतुर्भेद

चतुर्विधा गतिश्रेष्ठः नृत्यगान महोत्सवे।।२३५

अग्रचालि पृष्ठ चालि चालिपार्श्व द्वयक्रमे।
पादाग्रलम्बने चालि धिन् धिन् ताक् वृत्तेमहत् ।।२३६

अग्रगति इति श्रेष्ठः नृत्याग्रे मोददायकम् ।
धीरपद समाक्षेपे पृष्ठदेशे गतिंचरेत् ।।२३७

किंचित् ह्रस्वगति पृष्ठे छंदपादैः सुयत्नतः।
प्रत्यावर्त्तन कर्त्तव्यं नृत्यारंभ स्थलावधि।।२३८

संमुख मुखयोगेन पार्श्वदृष्टि मनोरमम् ।
पृष्ठचालि इतिरम्यं गीताभिनये उत्तमम् ।।२३९

उकुटादिसमायुक्ते आचरेत् विधि पूर्वकम् ।
गीतभाव प्रकाशार्थे पार्श्वगति विचक्षणः।।२४०

ह्रस्वताल समाश्रित्य दर्शयेत् नटीमुत्तमम् ।
समाकारे द्वयोर्भंगे दर्शयेत् समसंख्यकान् ।।२४१

बुश्चिकादि समायुक्ते हस्तकादर्शयेत् सुधीः।
यत् पार्श्वे चालि कर्त्तव्यं तत्पार्श्वे मुख शोभनम् ।।२४२

नमुखंविषमे चैव विपरीतेऽधमं भवेत् ।
गतिमध्ये यदा कुत्र भावांतर प्रयोजनम् ।।२४३

कंपन

कंपन सह नृत्यांगं दर्शयेत् परिवर्त्तनम् ।
कटिदेश सुयत्नेन चालयेत् झटिति पुनः।।२४४

अन्यभावकराभासे दर्शयेत् निपुणैः सदा।
कंपनइतिसश्रेष्ठः गीतमान महोत्सवे।।२४५

उडूनृत्ये सदाध्येयकटि नृत्य विचक्षणम् ।
त्रिभंग कटि संप्राप्तेछंद पद प्रयोजने।।२४६

कटिकंपन कर्त्तव्यं करमुद्रासहस्तथा।
युग्म नृत्येकदाभावे कृष्णस्य रूपचिंतने।।२४७

कंपनादिसमायुक्ते दर्शयेत् तुङ्गमासनम् ।।
नृत्येछन्द सदाध्यायेद्विविधं ख्यातसर्वदा।
खण्डछन्द्यावृत्ति क्षेत्रे दीर्घछान्द इतीर्य्यंते।।

नृत्यकाले यथाताल तथापादंतुपातयेत् ।
पादानुसारमुखेन मुच्चार्य्य खण्ड छन्दकम् ।।

उकुट इति सख्यात उड्रे नृत्यार्थि मण्डले।
खण्ड छन्द सदारम्य ताल संदर्शनार्थये।।

गीताभिनय कालेन प्रसंगक्रमभेदतः।
काव्यांशमाचरेत् तत्रछान्द गायनतत्पराः।।

नानारसमयं भद्रं पौराणिकाश्रितं महत् ।
लीलाख्यानं सदाध्येयं छान्द ताले विशेषतः।।

आदौ रंगालये रम्ये सौम्यासनसमाचरेत् ।
कुतप मध्यदेशेच गायमोत्तर संमुखे।।

तालानुस्रुत पादश्चभंगी हर्षप्रदायकः।
शृणुत्वखण्डछन्दस्य लक्षणंमूलतः सुधीः।।

बहुधामुकुटख्यातं नृत्यार्थि मण्डले सदा।
संक्षेपात्र प्रवक्षामि तालज्ञानार्थ संप्रति।।

पादानुस्रृत मध्याङ्ग पादछान्दानुसारतः।
पातपातंतु कर्त्तव्य खण्डछन्दो गतेतथा।।

शृणुत्वं खण्ड छन्दादि लघुवाक्यंतथाक्रिया।
कटिभंगीतथा हस्तलेपनादि यथाक्रमम् ।।

शिष्टाचारे प्रवेशान्ते नाचरेत् छन्दखण्डकं।
केवलं दर्शयेत् त्रय नृत्येत अभिनन्दनं।।

छन्दाभिनन्दनं दिव्यं पञ्चधा मुख्यजायते।
स्कन्ध[1] स्पर्शा च भूमी[2] च वक्ष[3] संमुख एवच।।
कपोलस्पर्शना दिव्या शृणुतत् लक्षणंक्रमात् ।
कुम्भपादे द्वयोर्मुष्टि मुख साधारणं तथा।।

मुद्रिता नयनं नृत्ये स्कन्धास्पर्शातु दर्शयेत् ।
ध्वज हस्त द्वये भूमौ भूम्याभिनन्दनं चरेत् ।।

आसिका पादपृष्ठे च संमुखेलपनं तथा।
स्फारिता नेत्र वक्षे, च मुष्टिद्वयं समाकृते।।

ठिआचालि समायुक्ते मृदुपादाङ्गचालयेत् ।
कपोलोभय पार्श्वेच दर्शयेध्वजवल्लवाः।।

एकपाद समाकारे यदिअन्या प्रसारिता।
पृष्ठार्द्ध भूमीसंस्पर्शे तेयन दत्ता इतितथा।।

उत्तोलने च पार्श्वाङ्गे दृढनृत्येथवा सदा।
तेयनदत्ता तु कर्त्तव्यं खण्ड नृत्य महोत्सवे।।

तेया न तेयन दत्ता च छन्द मिलनेदृढनृत्यगे।
तैयन् धत्ता इतिख्यातः गीताभिनये वा चरेत् ।।

हस्ताभ्यांउभयोः पार्श्वे तेयनदत्ता कृतेपद।
सम्भवति तथा धा धा धेट् कुम्भे च सुशोभना।।

कम्पनकाल संप्राप्ते भंग्याङ्ग परिवर्त्तने।
दृते तेयन दत्ता कुर्य्यात् धैट धत्ता इतिर्य्यते।।

पादोभयाग्रे नृत्यार्थि कुम्भपाद यदिचरेत् ।
हस्तपक्षकरा यत्र टे टे इतिभिधियते।।

अथवा अग्र मुक्तंच पाते पृष्ठांश चुम्बिते।
ध्वजहस्त द्वयं तत्र टे टे कुर्य्यात् मनोरमा।।

नृत्यारम्भे च मध्येच प्रान्तभागे विलक्षणे।
पादपातंतुकर्त्तव्ये धै दत्तादि यथा ताम् ध्धत्ताथेयो।

उकुटादि समायुक्ते वन्दनांते विचक्षणा।
आचरेत् क्षुद्र तालाभ्यां नर्त्तने सुमनोहरम् ।।

छन्दारम्भे तथा नृत्यमाचरेत् नटी सर्वदा।
तालानुसृत शब्दाभ्यां पाद हस्त समन्वये।।

ताम् धत्ता त्ते यां इतिआदौ समाचरेत् ।
(रचेत) रचयेत् नृत्याङ्गणे रम्ये शृणुन्यासस्तु यत्नतः
पादद्वय समानेच भूमौ सम निपातिते।
चतुर दक्षिणोयुक्ते वाम शिरोर्द्धये तथा।।

दक्षिण लम्बितापार्श्वे दृष्टिं पार्श्वेच निश्चलम् ।
ताम् इति समाक्षा तं धत्ता शृणु विधानतः।।

पादद्वय तथा न्यासेत् चलनंच शनैः शनैः।
हस्तैक अधरे न्यस्तं अन्या लम्बाकृते तथा।।

धत्ताइति सदारम्य नृत्य नाट्य महोत्सवे।
पश्चात् गति इति ध्येयं क्षेत्र प्रान्ते विशेषतः।।

एक पाद समानेच अपरे अङ्गुलैः सह।
गमयेत पृष्ठ भागेच कराभ्यां कटिमाश्रिते।।

छन्दकुम्भोपमं पाद दृष्टि भूमौपरि तथा।
त्ते नृत्यार्थि दिव्येन आचरेत् विधिपूर्वकं।।

पुनः यार्थं तथा पादे कृत्वागतिञ्च पूर्ववत् ।
हस्तद्वय ध्वजाकारे हृदयेच कराङ्गुलौ।।

मध्यमा मध्यमा अग्रे दृष्टि मुखएवच।
ताम् धत्ता तेया मिति आचरेत् नटी उत्तमा।।

एवमाचरेत् न्यास नृत्य मध्ये क्षणे क्षणे।
ताम्धत्ताधिकं तत्ता अनुसारेच पातनम् ।।

आचरेत पाद युत्तेच गुरुज्ञानानुसारतः।
श्रृणुउकुटे संक्षिप्ते नृत्याचार क्रमान्वये।।

शिष्टाचारे तथारम्भे वटु नृत्येविशेषतः।
देश रित्यानुसारे उत्कुटं वहुधा यदि।।

अस्मद् देशानुसारे उकुट त्रिविधोत्तमा।
अथ शिष्टाचार उकुट
नृत्यारम्भे धनुःपादे केवलं पादचालनम् ।।

मृदुभावे तथा पाद कटि नेत्रादि क्षीणतः।
आलाप समये यत्र तालानुरतगायकाः।।

तत्काले तु तथाकुर्य्यात् मृदुखण्डितच्छन्दकं।
धिन् त्ता नाक धिना
धिन त्ता नाक् धीना ताक्
अपरञ्च- धीन् धीन् त्ताक्

पाद पातान्तरे कुर्य्यात् कटिचालन मुख्यतः।
षोडशं अथवा सूर्य्य अथवा दिग वारकं।।

ततः गत्वा त्रिपादंच संमुखंप्रति तत्क्षणात् ।
आरभ्यते तथा दिव्येगीताभिनये यत्नतः।।

गीतारम्भे यथागीत तत्तालानुस्तुतं पदं।
प्रदर्शनार्थ तत् कर्य्याद् प्रारम्भ नृत्यमादकम् ।।

नृत्यकाले तथाध्येय उकुटं खण्डछन्दक।
किञ्चित् क्षीणं कदा वेगं कदा द्रुतादि माचरेत् ।।

अथ प्रारम्भिक उकुटोदाहरणः।

धीन् त्ता नाक् धीना तिन्ता, "नाक् धीना तिनत्ता से"
झेणे झेणे धिनत्ता ताक् धीना तिन्ता।
केट्टे केट्टे धिनत्ता ताक् धीना तिन्ता।
झेणे झेणे कट् धाक् तिन्धाक् तिन् धाक्।
धाध्धा धिन् धाक् धिन् त्ता, इत्यसम् ।।

अपरञ्च

ताम् त्ता ना ते त्ताम् से तारकट् धत्ता नाध् त्तिन्ना
ताम् त्ता नाते त्ताम् , त्ताधर् कट् धा त्ताधर्कट् धा।।
ताम् त्ता नातेताम् तकट् तरकधै तरकटतक्धै।
तम्त्ता नातेताम् इत्यसम्

अपरञ्च

धै धै ताक् धिनाक् धिन् ताक् से ताके धेइ धैक्
धिनाक् धिनताक् तरकट् धै धैक् धैक् धिनाक् धिनत्ताक

अपरञ्च

ताम् त्ता ना ते त्ताम् से तारकट् धत्ता नाध्तिन्ना

ताम् त्ता नातेत्ताम्, त्ताधर्कट् धा त्ताधर्कट् धा।।

ताम् त्ता नातेत्ताम् से तरकट् धत्ता तरकट् धत्ता

ताम् त्ता नातेताम् तरकट् तकधै तरकटतक्धै।

ताम् त्ता नातेताम् इत्यसम्

अपरञ्च

धै धै ताक् धिनााक् धिन् ताक् से ताक् धेइ धैक्

धिनाक् धिनताक् तरकट् धै धैक् धैक् धिनाक् धिनत्ताक

तरकट तक् थै तक् थै तक् थै ताक् धिनाक् धै

ताक् धा तरकट् ताक् धा ताक् धै तारकट् ताक् ध्धा

तरकट ताक् ध्धा से ताक् धिलाङ्ग धिन् त्ता धैधै।।

वटु नृत्ये तथान्तेच गीतानु सारछन्दकम् ।

आचरेत् द्रुत तालाभ्यां वटु नृत्य महोत्सवे।।

अधुना नृत्यज्ञानार्थं वक्षाभिरागलक्षणं।

मल्लारादि क्रमेछन्द आदिताल विशेषतः।।

जय जय शंकर किंकर भवजलभंजन जनरञ्जन आ

नवशशिमण्डित शिखण्ड चण्डकर शशधर वह्नित्रिलोचन आा।

तिअ इह आइअ अइया तिअअइअ इति कृष्ण दासोक्त

अ इ अ इ आ आ आ आ आ आ आ आ इतिध्रुवालापः

ताक् धिना नाक् धिना तेत् नाधिना धिन् धिनधिना ताम् धिन्ना

ताम् तारकट् धिना ताक्धि–नाकधिना धिन् धिन् धिन् तामधिना

नाटरागे कैकतालेच

धा दिक् दां दां किट् कट क्रिण खेड्
थादिक् थाङ्ग तां त्वां तारेत्त थारि थारिकुथासि द्दिक् से
दिअ तात तात्ता दिअ अत्तात् ता ता त तात्त।
द्रिमिकट् धदिक् वाथो दा दि दिक् रट कट् ।।

मट कट कत्ति धा किनिगोडि धाकिडि गिंडि।
आ कु कु चैँ त्र चैँ त्र चैँ चैँ चैँ
रैँ तारि रैँ तारि थारि मट कट कुआँ
इति कृष्णदासेनोक्तम्
एताः बहुविधाःछन्द खथ्यातासङ्गीतमण्डले।

गीतप्रकाशग्रन्थेच संगीतरसिवेः तथा
नृत्ये छन्दः सदाध्येयं द्विविधंख्यात सर्बदा।
खण्डछन्दावृत्तिक्षेत्रे दीर्घछान्द इतीर्यते।।

नृत्यकाले यथातालस्तथा पादंतु पातयेत् ।
पादानुसारमुच्चार्य्यं मुखेन खण्ड छन्दकम् ।।

उकुट इति सख्यातः उड्रे नृत्यार्थी मण्डले।
खण्ड छन्दःसदारम्यं ताल संदर्शनार्थये।।

गोताभिनय कालेन प्रसङ्ग क्रम भेदतः।
काव्यांशमाचरेत् तत्र छान्दगायन तत्पराः।।

नानारसमयं भद्रं पौराणिकाश्रितं महत् ।
लीलाख्यानं सदाध्येयं छन्दगान्ते विशेषतः।।

आदौरङ्गालयेरम्ये सौम्यासन समाचरेत् ।
कुतप मध्यदेशेच गायकः संमुखे तथा।।

तालानुसृत पादंच भङ्गीहर्षप्रदायकः।
शृणुत्वं खण्डछण्दस्य लक्षणं स्थूलतः सुधीः।।

बहुधामुकुट ख्यातः नृत्यार्थी मण्डले सदा।
संक्षेपेण प्रवक्ष्यामि तालज्ञानार्थ संप्रति।।

पादानुसृत मध्याङ्ग पादछन्दानुसारतः।
पादपातं तु कर्त्तव्यं खण्ड छन्दोगते तथा।।

शृणु त्वं खण्ड छन्दादि लघुवाक्यं तथाक्रिया।
कटिभङ्गीतथाहस्त लपनादि यथाक्रमम् ।।

शिष्टाचारे प्रवेशान्ते नाचरेत् छन्दखण्डकं।
केवलंदर्शयेत् त्रयं नृत्ये च अभिनन्दनम् ।।

छन्दाभिनन्दनं दिव्यं पञ्चधा मुख्य केवलं।
स्कन्धस्पर्शा च भूमि च वक्ष संमुख एव च।।

कपोलस्पर्शना दिव्या शृणु तल्लक्षणं क्रमात् ।
कुम्भपादेद्वयोः मुष्टि मुखंसाधारणंतथा।।

मुद्रितानयनंनृत्ये स्कन्धस्पर्शातु दर्शयेत् ।
पादपृष्ठोपरिरूढा संमुखे शिरदर्शयेत् ।।

पादहस्तद्वये भूमौ भूम्याभिनन्दनंचरेत् ।
आसिका पादपृष्ठेच संमुखेलपनंतथा।।

स्फारिता नेत्र वक्षेच मुष्टिद्वय समाकृते।
ठिआचालिसमायुक्ते मृदुपादाङ्ग चालयेत् ।।

कपालोभय पार्श्वेच दर्शये ध्द्वज वल्लवाः।
एकपाद समाकारे यदि अन्या प्रसारिता।।

पृष्ठार्द्धभूमिसंस्पर्शे तेयन दत्ता इति तथा।
उत्तोलने च पार्श्वाङ्गे द्रुतनृत्येथवा सदा।।

तेयन दत्ता तु कर्त्तव्यं खण्डनृत्ये महोत्सवे।
तेया न तेयन दत्ता च (छन्द) मिलनेद्रुतनृत्यगे।।

तैयन धत्ता इतिख्यातः गीताभिनय कर्मणि।
हस्ताभ्यां उभयोः पार्श्वे तेयन दत्ता कृतेपदम् ।।

सम्भवन्ति तथा धा धा धेट् कुम्भे च सुशोभना।
कम्पन काल संप्राप्ते भङ्गयाङ्ग परिवर्त्तने।।

द्रूते तेयन दत्ता कुर्य्यात् धैट्धत्ता इतीर्यते।
पादोभयाग्रे नृत्यार्थी कुम्भपादं यदाचरेत् ।।

हंसपक्षकराःयत्र टे टे इत्यभिधियते।
अथवाअग्रमुक्तेच पाते पृष्ठांच चुम्बिते।।

ध्वजहस्तद्वयंतत्र टे टे कुर्य्यान्मनोरमा।
नृत्यारम्भे च मध्येच प्रान्तभागे विलक्षणे।।

पादपातं तु कर्त्तव्यं धैदत्तादि यथातथा।
उकुटादि समायुक्ते वन्दनान्ते विचक्षणा।।

आचरेत् क्षुद्रतालाभ्यां नर्त्तने सुमनहारं।
छन्दारम्भे तथानृत्य माचरेत् नटीसर्वदा।।

तालनुसृत शब्दाभ्यां पादहस्त समन्वये।
ताम् धत्ता त्तेयां इति आदौ समाचरेत् ।।

(रचेत्) रचयेत् नृत्याङ्गणेरम्ये शृणुन्यासस्तु यत्नतः
पादद्वय समानेच भूमौ समनिपातिते।।

चतुरः दक्षिणोर्युक्ते वामशिरोर्द्धये तथा।
दक्षिण लम्बिता पार्श्वे दृष्टिपार्श्वे च निश्चलं।।

ताम् इति समाख्यातं धत्तां शृणु विधानतः।
पदद्वयेंतथा न्यासेत् चलनं च शनैः शनैः।।

हस्तैकं अधरे न्यस्तं अन्या लम्बाकृते तथा।
धत्ता इति सदारम्य नृत्य नाट्य महोत्सवे।।

पश्चात् गति इति ध्येयं क्षेत्रप्रान्ते विशेषतः।
एकपाद समानेच अपरंअङ्गुलैःसह।।

गमयेत् पृष्ठभागे च कराभ्यां कटिमाश्रिते।
छन्दकुम्भोपमं पादं दृष्टिभूमौपरि तथा।।

त्ते नृत्यार्थी दिव्येन आचरेत् बिधिपूर्वकं।
पुनः यां थं तथा पादे कृत्वागतिंच पूर्ववत् ।।

हस्तद्वय ध्वजाकारे हृदयेच कराङ्गुलौ।
मध्यमा मध्यमा अग्रे दृष्टिः संमुख एवच।।

ताम् धत्ता तेयामिति आचरेत् नटीमुत्तमा।
एवमाचरते न्यासंनृत्यमध्ये क्षणे क्षणे।।

ताम् धत्तादिकं तत्ता अनुसारे च पातनं।
आचरेत् पाद युक्ते च गुरुज्ञानानुसारतः।।

शृणु उकुट संक्षिप्ते नृत्याचार क्रमान्वये।
शिष्टाचारे तथारम्भे वटुनृत्ये विशेषतः।।

देशरूच्यनुसारेण उकुटं बहुधायदि।
अस्मद्देशानुसारेणं उकुटं त्रिविधोत्तमा।।

अथ शिष्टाचार उकुटम

नृत्यारम्भै धनुःपादे केवलंपादचालनं।
मृदुभावे तथा पाद कटि नेत्रादि क्षीणतः।।

आलाप समये यत्र तालानुरत गायकाः।
तत्काले तु तथा कुर्य्यात् मृदुखण्डित छन्दकम् ।।

धिन् त्ता नाक् धिना
धिन् त्ता नाक् धिना ताक्
अपरञ्च- धिन् धिन् त्ताक्।

पादपातान्तरे कुर्य्यात् कटिचालन मुख्यतः।
षोडशं अथवा सूर्य्यं अथवा दिगवारकं।।

ततः गत्वा त्रिपादंच संमुखंप्रति तत् क्षणात् ।
आरम्यते तथा दिव्ये गीताभिनय यत्नतः।।

गीतारम्भे यथागीत तत्तालानुसृतं पदं।
प्रदर्शनार्थं तत् कुर्य्यात् प्रारम्भनृत्यमादकम् ।।
नृत्यकाले तथाध्येयं उकुटं खण्डछन्दकं।
किञ्चित् क्षीणं कदावेगं कदा द्रुतादिमाचरेत् ।

अथ प्रारम्भिक उकुटोदाहरणम्

धीन् त्ता नाक् धीना तिन् त्ता नाक् धीना तिनत्ता से
झेण झेणे धिनत्ता ताक् धीना तिनत्ता। केटे केटे।
धिनत्ता ताक् धीना तिन्ता झेणे झेणे कट धाक् तिन् धाक्,
तिन्धाक् धा धा धिन् धाक् धिन् त्ता इत्यसम् ।
अपरञ्च- ताम् त्ता नाते त्ताम् से तार्कट् ।

धत्ता नाध् चिन्ना ताम् त्ता नातेत्ताम् त्ता धर्कट धात्ताधर् कटधा
ताम् त्ता नाते ताम् से तरकट् धत्ता तरकट् धत्ता।
ताम् त्ता नाते ताम् तरकट् तक् धै तरकट तकधै
ताम् त्ता नाते ताम् इत्यसम् ।।

अपरञ्च- धै धै ताक् धिनाक् धिन् ताक् से
ताक् धेइ धैक् धिनाक् धिन् ताक् तरकट् धै।
धैक् धैक् धिनाक् धिन् त्ताक् तरकट तक् थै।।

तक्थै तक्थै ताक् धिनाक् धै ताक् धा तरकट्
ताक् धा ताक् थै तारकट् ताक् धा तरकट् ताक् धा से।
ताक् धिलाङ्ग धिन् त्ता धै धै।।

वटुनृत्ये तथान्तेच गीतानुसार छन्दकं।

आचरेत् द्रुततालाभ्यां वटुनृत्यं महोत्सवे।।

नृत्यज्ञानार्थमधुनावक्ष्यामि रागलक्षणं।

मल्लारादिक्रमेछन्दः आदिताल विशेषतः।।

जय जय शङ्कर किङ्कर भवजलभञ्जन जनरञ्जन आ नवशशि मण्डित शिखण्ड चण्डकरशशधर वह्नित्रिलोचन आ तिअ इह आइअ अइआ तिअ अइअ इति कृष्णदासोक्त अइअ इआ आ आ आ आ आ आ आ इति ध्रुवालापः। ताक धिना नाक् धिना तत्ता नाधिना

धिन् धिन् धिना ताम् धिन्ना

ताम् तारकट् धिना ताक् धि नाक् धिना धिन् धिन्

धिन्न ताम् धिना।।

नटरागेण एकताले च

धा दिक् दां दों किट् कट् क्रिण खेड़

था दिक् थाङ्ग त्वां तारेत थारि, थारि कुथासि दिक् से

दिअ तात तात्ता दिअ त्तात् ता ता त ता त्ता।

द्रिमिकट धदिक् दाथो दादि क् दिक् रट कट मट कट

कत्ति धा किनिगोडि धाकिडि गिडि आ कु कुचैँ त्रचैँ त्र

चै चैँ चैँ रैँ तारिरैँ तारि थारि मट कट कु आँ

इति कृष्णदासेनोक्तम्

एताः बहुविधाः छन्दः ख्यातःसंगीत मण्डले।

गीत प्रकाशक ग्रन्थेच संगीतरसिके तथा।

तदानुसार कर्त्तव्यं उकुटाणि यथासुखम् ।
गीताभिनय कर्त्तव्यं काव्य वाक्यानुसारतः॥

वाक्यांशशब्दभावेन भावभाव विलक्षणे।
नटि विषय रूपेण दर्शयेत् भावविस्तरम् ॥

एताभिनय संख्यातः सर्वेषांनन्द वर्द्धकम् ।
देवतानन्द वर्द्धश्च नृपचित्त विमोदकम् ॥

शुद्धाभिनयज्ञानेन नृत्यार्थी सिद्धदायते।
दशाभिनय मात्रेण सर्वपापं विनश्यति॥

शताभिनये प्रत्यक्षं मुक्तिजायेत निश्चितम् ।
धनं धान्यंञ्च गोलक्ष्मी वृत्ति र्भवति निर्मलम् ॥

नृत्यमहोत्सवे वापि देवताग्रे सुभक्तितः।
त्रयाभिनय मात्रेण चतुवर्ग फलंभवेत् ॥

रङ्गभूमौपरिदिव्ये दशनृत्यंयदिचरेत् ।
रङ्गप्रियमहादेवी सन्तोषंजायतेक्षणात् ॥

रङ्गभूमिमहं वक्ष्ये शृणु लक्षण यत्नतः।
नाट मण्डप सख्यातः नृत्यर्थं स्थलमुत्तमम् ॥

नाट्यशालालक्षणं

शुद्धभूमौपरि कुर्य्यात् शोधनादि सुखावहं।
रङ्गभूमिं तु कर्त्तव्यं तथाच नाट्यमण्डपं॥

रङ्गभूमि द्विविधञ्च नाट्यवेश्म च मण्डपम् ।

नाटकार्थेरङ्गवेश्म नृत्यार्थे नाट्यमण्डपम् ।।
राजपुराङ्गणे मध्येकुर्यात्तु नाटमण्डपम् ।
नृत्यमण्डप पुण्यंच श्रेष्ठ नृत्य महोत्सवे।।

चतुरस्त्राकृति मञ्च द्विपीठंस्तम्भशोभितं।
द्वात्रिंश हस्त विस्तारं कुर्य्यात् पीठंसुखावहं।।

नाटपीठाख्यआद्येच चतुरस्त्राकृतिसमम् ।
पश्चिमे युग्मसोपानं नवावर्त्तंच सम्मुखे।।

नानाचित्रमयंपीठं नाना कर्ममयं शुभम् ।
कुम्भमीन श्च पुष्पश्च विलिख्य पीठमुत्तमे।।

चतुःहस्त प्रमाणेन मञ्चं कुर्य्यात् चतुर्दिगे।

दर्शक मञ्च एतेषां पीठोन्यंच तथोपरि

शुभलग्ने तु कर्त्तव्यंरङ्गपीठं सुयत्नतः।
द्विहस्तंवात्रिहस्तोच्च कुर्य्यात्तु मत्त वारणि।।

प्रतिकोणेच कीलश्च सोपान प्रतिमध्यमे।
नानामूर्त्तिमयंपीठं उर्द्धवपीठ सुलक्षणम् ।।

अर्द्धहस्तप्रमाणेन कुर्य्यात् वारणमण्डलं।
गजबन्ध श्च पुष्पश्च पर्ण्ण कुम्भं सु यत्नतः।।

मत्तवारणि ऊर्द्धवे च स्तम्भं कुर्य्यात् शुभक्षणे।
ब्राह्मणः पश्चिमे चैव मध्ये क्षत्रियमेवच।।

वैश्यपूर्वे तथापूर्वे शूद्रस्तम्भचतुष्टयं।
षोडशस्तम्भ कुर्बीतं विंशहस्त प्रमाणतः।।

द्विहस्त चालमध्येच चाल पीढाकृतिंचरेत् ।
चालोर्द्धेच गवाक्षश्च नानामूर्त्ति विधानतः।।

पुनश्चालोपरि तत्र कुम्भ वस्त्र चिरालकं।
मध्यदेशे नृत्यवेश्मोपरि चन्द्रातपंमहत् ।।

उत्तर पार्श्वसंरुद्धच उभयस्तम्भमध्यतः।
कुतपार्थे सदा स्थानं वामे वीणाच गायिका।।

उत्तरगायिका सव्ये मर्दलं कांस्य तालिकं।
काष्ठताल तथा पृष्ठे नाट्याचार्य्यं तथोत्तरे।।

मध्ये नटी सदामुख्यः पश्चिमे ईष्ट विग्रहं।
दक्षिणे मध्यदेशेच नृपस्थान सुमण्डितं।।

दक्षिणपश्चिमोर्मध्ये गुरुपुरोहितस्थलं।
आग्रे वैश्य स्तम्भांशं पुरवगोर्थ निर्ण्णयेत् ।।

तत्पार्श्वे सेवकाःसर्वे दर्शकाःपरिदर्शकाः।
इष्टमुख्यं सदा नाटे नृत्ये लक्ष्यं नरोत्तमं।।

दर्शका उपलक्ष्यश्च नाटीसंलक्षिकामहत।
नृत्य समर्पणंकुर्य्यात् इष्टार्थंविधिपूर्वकं।।

प्रदर्शयेत् ततः नृत्यं नृपतोषार्थ यत्नतः।
नृपदेवतनुःसाक्षात् कुशली सचीवप्रियः।।

सर्वज्ञानप्रियोराजा कलाचित्र रतिप्रियम् ।
खेमुण्डि राजमार्त्तण्डा नक्ष्मीमाङ्कितंपदं।।

नारायण महीपालः सदा नारायणः प्रियः।
तस्य तोषार्थं नृत्यार्थी मोदार्थं ग्रन्थमुत्तमम् ।।

नृत्य दर्पण मार्गेण ग्रन्थाभिनय चन्द्रिका।
नृत्यखण्ड भावखण्ड छन्दखण्ड समन्वितं।।

त्रिखण्ड पुटितंग्रन्थं नृत्य शास्त्रमिदंशुभम् ।
महेश्वर दिज श्रेष्ठः नृत्यज्ञानविशारदः।
सुकण्ठगायकरत्न नृपनारायणाश्रितम् ।।

इति श्री महेश्वर महापात्र विरचिते अभिनयचन्द्रिकायां
छन्दखण्डः समाप्तश्चायं ग्रन्थः।।

दिव्यसिंहदेवमहाराजस्यविजयसम्वत्सरेद्वाविंशाङ्के चैत्र शुक्ल नवम्यायांतिथौ लेखनकार वड़खेमुण्डि मधुदाशेनलिखितम् ।

[illegible]
[illegible]

[illegible]
[illegible]

[illegible]
[illegible]
[illegible]

[illegible]

[illegible]

[illegible]
[illegible]

शिवशङ्कर त्रिपाठी



जन्म : २० फरवरी, सन् १९३६ ई०।
जन्मस्थान : ग्राम बेदौली, माण्डा, जनपद - इलाहाबाद।
पालि भाषा और साहित्य में डी०फिल्०। हिन्दी, संस्कृत और अंग्रेजी भाषा साहित्य के अधीती।
श्री त्रिपाठी जी द्वारा हिन्दी में रचित काव्य, कथा और आलोचना, इतिहास-संस्कृति-विषयक अनुशीलनात्मक प्रचुर साहित्य से अतिरिक्त, संस्कृत तथा पालि भाषा-साहित्य की कतिपय विशिष्ट रचनाएं- हिन्दी के महाकवि देव द्वारा लिखी हिन्दी अध्येताओं के लिए सर्वथा अज्ञात नायिका-भेद ग्रन्थ-शृङ्गार विलासिनी।
मुगलकालीन भारतीय समाज और राजनीतिक परिवेश तथा संस्कृत साहित्य के वर्चस्व भट्टवंश का यश-गाथापरक काव्य-भट्टवंशकाव्यम्। रामकथा-विषयक काव्य-रामकर्णामृतम्, चीनी त्रिपिटक में संकलित रामकथा विषयक दो जातकों-अनामकम् तथा दशरथ कथानकम् पर आधारित काव्यकृति चीन रामायणम् हिन्दी-अंग्रेजी अनुवाद-सहित। 'गीतशङ्कर' संस्कृत गीत काव्य का हिन्दी अनुवाद एवं संगीत-माधवम् (विस्तृत भूमिका-सहित हिन्दी अनुवाद)। अद्यावधि अप्रकाशित नायिका-भेद विषयक ग्रन्थ 'शृङ्गारमाला' का सम्पादन और विस्तृत भूमिका (संस्कृत, हिन्दी, अंग्रेजी) संग हिन्दी अनुवाद। जैनकवि पद्मसुन्दर कृत अकब्बरसाहि शृङ्गारदर्पणः (पाण्डुलिपि)। साथ में संस्कृत-काव्यशास्त्र विषयक (संस्कृत-हिन्दी-अंग्रेजी) विस्तृत विवेचन। यह जैन भाषा-साहित्य में एक मात्र नायक-नायिका-विश्लेषक, शृङ्गाररसाश्रयी रचना है।
पालि साहित्य की अतिप्रख्यात आठ कवयित्रियों का काव्य-संकलन। विस्तृत भूमिका सहित काव्य रूपान्तरण सेट्ठ थेरी गाथा समग्ग। काव्यशास्त्र एवं पालि साहित्य पालि भाषा-साहित्य का प्रथम एवं प्रामाणिक काव्य-शास्त्रीय विवेचना। भगवान् बुद्ध की परिनिर्वाण-तिथि-विषयक नयी स्थापना, ई०पूर्व (५१६-५१२) पूर्वार्द्ध भाग। पालि भाषा-कथासाहित्य 'जातक-अट्ठकथा' का हिन्दी-अनुवाद। पालि मूल-संग हिन्दी अनुवाद पांच खण्ड (तीन हजार पृष्ठ) प्रकाशित। दो खण्ड (दो हजार पृष्ठ) प्रकाशन-क्रम में। पालिभाषा-विकास-क्रम-विषयक प्रामाणिक विवेचन।
हिन्दी-संस्कृत की ७ पुस्तकें पुरस्कृत। त्रैमासिक संस्कृत पत्रिका 'संगमनी' का संपादन। संस्कृत पत्रकारिता के लिए 'नारद पुरस्कार' से सम्मानित।

भारतीय मनीषा सूत्रम्

दारागंज, प्रयाग

ISBN 819088906-0

9 788190 889063